112/1

अथ

112/1

मुक्तावली प्रारभ्यते ॥

विश्वनाथ-प्रणीता

श्रीगणेशायनमः॥ निर्विघ्नमस्तु॥ चूडामणीकृतविधुर्वलयीकृतवासुकिः॥ भ
वो भवतु भव्याय लीलाताण्डवपंडितः॥१॥ निजनिर्मितकारिकावलीमतिसंक्षि
प्तचिरंतनोक्तिभिः॥ विशदीकरवाणि कौतुकान्ननुराजीवदयावशंवदः॥२॥
सद्द्रव्यागुणगुंफिता सुकृतिनां सत्कर्मणां ज्ञापिका सत्सामान्यविशेषनि
त्यमिलिताभावप्रकारोज्वला॥ विष्णोर्वक्षसि विश्वनाथकृतिना सिद्धां
तमुक्तावली विन्यस्ता मनसो मुदं वितनुतां सद्युक्तिरेषा चिरं॥३॥ विघ्न
विघातायकृतं मंगलं शिष्यशिक्षायै निबध्नाति॥ नूतनजलधररुचये गो
कृष्णाय पवधूटीदुकूलचौराय॥ तस्मै नमः संसारमहीरुहस्यबीजाय॥४॥ नूत
नेति॥ ननु मंगलं न विघ्नध्वंसं प्रति न वा समाप्तिं प्रति कारणं॥ विनापि मंग
लं नास्तिकादीनां ग्रंथे निर्विघ्नपरिसमाप्तिदर्शनादिति चेन्न॥ अविगीतशिष्टा

नचैवमप्यत्र व्यभिचारस्तत्र कारणताग्रहविरोधि भविष्यत्येव [illegible]

चारविषयत्वेन मंगलस्य सफलत्वे सिद्धे -- तत्र फलजिज्ञासायां संभवात्।
दृष्टफलकत्वे अदृष्टकल्पनाया अन्याय्यत्वात् उपस्थितत्वात् समाप्तिरेव फलं
यत्र कल्प्यते। इत्थं चैवं मंगलं न दृश्यते तत्रापि जन्मांतरीयं कल्प्यते। यत्र च सत्य न
पि मंगले समाप्तिर्न दृश्यते तत्र बलवत्तरो विघ्नो विघ्नप्राचुर्यं वा बोध्यं॥
प्रचुरस्यैवास्य बलवत्तरस्य विघ्नस्य निवारणे कारणत्वं बोध्यं विघ्नध्वंसस्तु मंगलस्य
द्वारमित्याहुः॥ नव्यास्तु मंगलस्य विघ्नध्वंस एव फलं समाप्तिस्तु बुद्धिप्रतिभा
एवं दिकारणकलापात्। न चैवं ततः सिद्धविघ्नविरहवता कृतस्य मंगलस्य निष्फल
तापत्तिरिति वाच्यं॥ तथैव शिष्टाचारात्। न च तस्य निष्फलत्वेन बोधकवेदा
प्रामाण्यं। सति विघ्ने तन्नाशस्यैव वेदबोधितत्वात् अत एव पापभ्रमेण कृत
प्रायश्चित्तस्य निष्फलत्वेपि न वेदाप्रामाण्यं मंगलं च विघ्नध्वंसविशेषे कारणं
विघ्नध्वंसविशेषे च विनायकस्तवपाठादिः। क्वचिच्च विघ्नात्यंताभाव एव
समाप्तिसाधनं। प्रतिबंधकसंसर्गाभावस्यैव कारणत्वात् इत्यत्र नास्तिका

५ इत्याप्राः। विघ्नशंकया तदाचारात् ५

दिकृतमथ ग्रंथेषु जन्मांतरीयमंगलजन्यदुरितध्वंसः स्वतः सिद्धो विघ्नात्यंताभावो वा
स्तीति न व्यभिचार इत्याहुः॥ ॥संसारेति॥ संसार एव महीरुहो वृक्षस्तस्य बी
जाय॥ एतेन ईश्वरे प्रमाणमपि दर्शितं भवति॥ यथा हि घटादिकार्यं कर्तृजन्यं
तथा क्षित्यंकुरादिकमपि॥ नच तत्कर्तृत्वं अस्मदादीनां संभवतीत्यतस्तत्क
र्तृत्वेनेश्वरस्य सिद्धिः॥ नच शरीरजन्यत्वेन कर्तृजन्यत्वसाधकेन सत्प्रतिप
क्ष इति वाच्यं॥ अप्रयोजकत्वात् अन्यथा कर्तृत्वेन कार्यत्वेन कार्यकारणभाव एवा
नुकूलस्तर्कः॥ द्यावाभूमी जनयन् देव एक इत्यादय आगमा अप्यनुसंधेयाः॥
द्रव्यं गुणस्तथा कर्म सामान्यं सविशेषकं॥ समवायस्तथाभावः पदार्थाः
सप्त कीर्तिताः॥ द्रव्यं गुण इत्यादि सप्तमस्याभावत्वकथनादेव षण्णां भा
वत्वं प्राप्तं तेन भावत्वेन पृथगुपन्यासो न कृतः॥ एते च पदार्था वैशेषि
कप्रसिद्धाः नैयायिकानामप्यविरुद्धाः॥ प्रतिपादितं चैवमेव भाष्ये॥ २

सि॰ मु॰

२

पृथ्वीआपोजलानितेजोवान्हिः मरुद्वायुः व्योमआकाशं देहीआत्मा दिक्कालमनांसि॥
एतानिद्रव्याणीत्यर्थः। ननुद्रव्यत्वजातौ किंमानं। नहितत्रप्रत्यक्षं प्रमाणं। घृततैलजतुप्रभृ
तिषुद्रव्यत्वाग्रहादितिचेन्न। कार्यसमवायिकारणतावच्छेदकतयासंयोग
स्यविभागस्यसमवायिकारणतावच्छेदकतयावाद्रव्यत्वजातिसिद्धेरिति। ननुद
शमंद्रव्यंतमः कुतोनोक्तं। तद्धिप्रत्यक्षेणगृह्यते। तस्यरूपवत्त्वात्कर्मवत्त्वाच्चद्रव्यत्वं।
तच्चगंधशून्यत्वान्नपृथिवी। नीलरूपवत्त्वाच्चनजलादिकं। तत्प्रत्यक्षेचालोकनिरपे
क्षंचक्षुः कारणमिति। चेन्न। आवश्यकतेजोभाववत्त्वेनोपपत्तौद्रव्यांतरत्वकल्पना
याअन्याय्यत्वात्। रूपवत्ताप्रतीतिस्तुभ्रमरूपा। कर्मप्रतीतिरप्यालोकापस
रणोपाधिकीभ्रांतिरेव। तमसः अतिरिक्तत्वेअनंतावयवादिकल्पनापत्त्या
कल्पनागौरवंस्यात्। सुवर्णस्ययथातैजसत्वंतथाग्रेवक्ष्यते। गुणान्वि
भजते। अथगुणाइति। एतेगुणाश्चतुर्विंशतिसंख्याकाः कणादेनकंठत
श्चशब्देनचदर्शिताः। तत्रगुणत्वजातिसिद्धिरग्रेवक्ष्यते। कर्माणिविभजते। ३

उत्क्षेपणमिति। कर्मत्वजातिस्तुप्रत्यक्षसिद्धा। एवमुत्क्षेपणादिकमपि। ननुभ्रमणा
दिकमपिपृथक्कर्मतया कुतोनोक्तमतआह। भ्रमणमिति। सामान्यंनिरूपय
ति। सामान्यमिति। तल्लक्षणंतुनित्यत्वेसत्यनेकसमवेतत्वं। अनेकसमवेतत्वं
संयोगादीनामप्यस्तिअतउक्तं नित्यत्वेसतीति। नित्यत्वेसतिसमवेतत्वंगगनप
रिमाणादीनामप्यस्तिअतउक्तंअनेकेति। नित्यत्वेसत्यनेकवृत्तित्वमत्यंताभावस्या
प्यस्त्यतोवृत्तित्वसामान्यंविहायसमवेतेत्युक्तं। एकमात्रवृत्तिस्तुनजातिः। त
थाचोक्तं॥ व्यक्तेरभेदस्तुल्यत्वंसंकरोथानवस्थितिः। रूपहानिरसंबंधोजाति
बाधकसंग्रहः॥१॥ द्रव्यादीति। परत्वमधिकदेशवृत्तित्वं। अपरत्वमल्पदे
शवृत्तित्वं। सकलजात्यपेक्षया व्यापकत्वादधिकदेशवृत्तित्वात्सत्तायाःपर
त्वं। तदपेक्षया व्यापकत्वादधिकदेशवृत्तित्वात्परत्वं। सत्तापेक्षया व्याप्यत्वा
त्वा दल्पदेशवृत्तित्वाद्द्रव्यत्वस्यापरत्वं। विशेषंनिरूपयति। अंत्यइति। अंतेअवसा
२ चान्यासांजातीनामपिपरत्वं। व्यापकत्वादिति। पृथिवीत्वाद्यपेक्षया २

सि॰ मु॰

नेवर्त्तत इत्यन्वयः। तदपेक्षया विशेषो नास्तीत्यर्थः। घटादीनां द्व्यणुकपर्यन्तानां तत्तदवय
४ वभेदात्परस्परं भेदः। परमाणूनां तु भेदको विशेष एव। स तु स्वत एव व्यावृत्तः। तेन त
३ तरा त्र विशेषापेक्षा नास्तीति भावः। समवायं दर्शयति॥ घटादीनामिति अवयवा
वयविनो र्जातिव्यक्त्योर्गुणगुणिनोः क्रियाक्रियावतोर्विशेषनित्यद्रव्ययो
श्च संबंधः समवायः॥ समवायत्वं नित्यसंबंधत्वं। तत्प्रमाणं तु गुणक्रियादिवि
शिष्टबुद्धिः विशेषणविशेष्यसंबंधविषया विशिष्टबुद्धित्वात् दंडीति विशि
ष्टबुद्धिवदित्यनुमानेन संयोगादिबाधात् समवायसंबंधसिद्धिः। न च स्वरूपसं
बंधेन सिद्धसाधनमर्थांतरता वा। अनंतस्वरूपाणां संबंधकल्पने कल्पना
गौरवाल्लाघवादेकसमवायसिद्धिः। न च समवायस्यैकत्वे वायौ रूपवत्ताबुद्धि
प्रसंगः। तत्र रूपसमवायसत्वेपि रूपाभावात्। न चैवमभावस्यापि वैशिष्ट्य
संबंधांतरं सिध्येतेति वाच्यं। तस्य नित्यत्वे भूतले घटानयनानंतरमपि घटाभा ४

दीनामप्य

अत एव उपमानमपि सप्तपदार्थभिन्नतया क्तिसादृश्यातिरिक्तपदार्थत्वमावां
कितं। ननु कथमेत एव पदार्थाः शक्तिसादृश्यादीनामतिरिक्तपदार्थत्वात्। तथा हि। मण्या
दिसमवहिते न वह्निना दाहो न जन्यते। तच्छून्येन तु जन्यते। तत्र मण्याद्यभाववह्नेर्दाहा
नुकूला शक्तिर्नोद्धियते। उत्तेजकेन मण्याद्यपसारणे च तत्र जन्यत इति कल्प्यते॥
एवं सादृश्यमप्यतिरिक्तपदार्थः जातिभिन्नत्वे सत्यभावघटत्वात्। सामान्ये
पि सत्वात् यथा गोत्वं नित्यं तथाश्वत्वमपीति सादृश्यप्रतीतेः। नाप्यभावः सत्वेन प्र
तीयमानत्वादिति चेन्न। मण्याद्यभावविशिष्टवह्न्यादेर्दाहादिकं प्रति मण्यभावादे
बवा र्वा स्वातंत्र्येण वा हेतुत्वं कल्प्यते। अनेनैव सामंजस्येनानंतशक्तितत्प्रागभावध्वंसक
कल्पना नोचिता। न चोत्तेजके सति प्रतिबंधकसद्भावे कथं दाह इति वाच्यं। उ
त्तेजकाभावविशिष्टमण्यभावस्य कारणत्वात्। सादृश्यमपि न पदार्थांतरं।
किंतु तद्भिन्नत्वे सति तद्गतभूयोधर्मवत्त्वं। चंद्रभिन्नत्वे सति चंद्रगताह्लाद
कत्वादिमत्त्वं मुखे चंद्रसादृश्यमिति। द्रव्याण्यभिभजते क्षित्यबिति। क्षितिः

यास्तु तत्र विरोधे मानाभावाद्ध्वंसादिकालावच्छेदेनात्यंताभावो वर्तते तद् इत्याहुः॥ ननु अभावा
५ नामधिकरणात्मकत्वं लाघवादिति चेन्न॥ अनंताधिकरणात्मकत्वमपेक्ष्यातिरिक्तकल्प
नाया एव लघीयस्त्वात्॥ एवं चाधाराधेयभावोप्युपपद्यते॥ एवं च ततश्छ[illegible]गंधरसाद्यभावानां प्र ६
त्यक्षत्वमप्युपपद्यते॥ अन्यथा तत्तदधिकरणानां तत्तदिंद्रियाग्राह्यत्वात्प्रत्यक्षत्वं न स्यात्॥ एतेन
ज्ञानविशेषकालविशेषात्मकत्वमभावस्येति प्रत्युक्तं॥ अप्रसक्तत्वापत्तेः॥ इदानीं पदार्थानां सा
धर्म्यवैधर्म्ये वक्तुं प्रक्रमते॥ समानामित्यादि॥ समानो धर्मो येषां ते सधर्माणस्तेषां भावः साधर्म्यं
समानो धर्म इति फलितार्थः॥ एवं विरुद्धो धर्मो येषां ते विधर्माणस्तेषां भावो वैधर्म्यं॥ विरु
द्धो धर्म इति फलितार्थः॥ ज्ञेयत्वं ज्ञानविषयता॥ सा च सर्वस्यैवास्ति॥ ईश्वरादिज्ञान
विषयतायाः केवलान्वयित्वात्॥ एवमभिधेयत्वं प्रमेयत्वादिकं बोध्यं॥ इत्येति॥ द्रव्यगुणक प्र
नेक र्मसामान्यविशेषाणां साधर्म्यमेतत् समवायित्वं च॥ यद्यप्यनेकत्वमभावेप्यस्ति॥ तथा
प्यनेकत्वे सति भावत्वं तथा चानेकभाववृत्तिपदार्थविभाजकोपाधिमत्त्वं फलितार्थः॥
तेन प्रत्येकं घटादौ नाव्याप्तिः॥ समवायित्वं समवायसंबंधेन संबंधित्वं॥ ननु समु ५
दायवत्त्वं सामान्याश्रयत्वात्॥ सत्तावंत इति॥ द्रव्यगुणकर्मणां सत्तावत्त्वं इत्यर्थः॥

गुणाश्चिदिति॥ यद्यपि गुणक्रियाश्रयत्वमाद्यक्षणे घटादावतिव्याप्तं क्रि
याश्रयत्वं गगनादावव्याप्तं तथापि गुणवद्वृत्तिधर्मवत्त्वं कर्मवद्वृ
त्तिपदार्थविभाजकोपाधिमत्त्वं चेत्यर्थः॥ नहि द्रव्यत्वं गुणवद्वृत्तिकर्मे
वद्वृत्तिर्वा॥ किंतु गुणत्वादिकं तथा आकाशत्वं न पदार्थविभाजकोपा
धिः॥ सामान्येति॥ सामान्यानधिकरणत्वं सामान्यादीनामित्यर्थः॥ पा
रिमाण्डल्यमणुपरिमाणं॥ कारणत्वं तद्भिन्नानामित्यर्थः॥ अणुप
रिमाणं तु न कस्यापि कारणं॥ तद्धि स्वाश्रयारब्धद्रव्यपरिमाणार
म्भकं भवेत्॥ तच्च न संभवति॥ परिमाणस्य स्वसमानजातीयोत्कृ
ष्टपरिमाणजनकत्वात् महदारब्धस्य महत्तरत्ववदणुजन्यस्या
णुतरत्वप्रसंगात्॥ एवं परममहत्परिमाणमतींद्रियसामान्यवि
शेषाश्च बोध्याः॥ आत्ममानसप्रत्यक्षे आत्ममहत्त्वस्य कारणत्वात्

पेरममहत्त्वपरिमाणमाकाशादेर्बोध्यं॥ तस्यापि न कारणत्वमित्याचार्याणां ३
मेतद्यद्युक्तमन्यत्र॥ ज्ञानातिरिक्तं प्रति कारणताया एवाचार्यैरुक्तो हे॥
६ दूरमपि योगिप्रत्यक्षविषयस्य न कारणत्वं तादृशमानसे सामान्येन प्रत्यास
त्तिलाघवमात्रं लिंगेनानुमितिकरणमित्यपि प्रायेणेतु न कारणत्वं किम
तत्राह अन्यथेति॥ तस्य कारणत्वस्य तत्रेति॥ समवायिकारणे प्रत्या
सन्नं कारणं द्विविधं समवायिकारणमित्यर्थः॥ अत्र यद्यपि तुरीतंतु
संयोगे पटासमवायिकारणत्वं स्यादेवं वेमादीनामपि बाताद्यसम
वायिकारणत्वं स्यादेवं तानादिकमपि अघ असमवायिकारणं स्यात्॥
तथापि पटासमवायिकारणलक्षणे तुरीतंतुसंयोगभिन्नत्वं देयं॥ तु
रीतंतुसंयोगस्य तुरीपटसंयोगं प्रत्यसमवायिकारणत्वं नैव वा
एवं वेमादिकं वेगस्य द्वौ असमवायिकारणं भवत्येवेति तत्कार्यासम
वायिकारणलक्षणे न तद्भिन्नत्वं देयं॥ आत्मविशेषगुणानां तु कुत्रापि ६
समवायिकारणत्वं नास्ति तेन तद्भिन्नत्वं सामान्यलक्षणे देयमेव॥ अत्र

वबुद्धिप्रसंगात्। घटाभावस्य तत्र सत्त्वात्। तस्य नित्यत्वात्। अन्यथा देशांतरेऽपि तत्प्रती
तिर्न स्यात्। वैशिष्ट्यस्य च तत्र सत्त्वात् मम तु श्यामघटे रक्तताकाले श्यामरू
पस्य नष्टत्वान्न तद्धीबुद्धिः। वैशिष्ट्यस्यानित्यत्वे तु अनंतवैशिष्ट्यकल्पने न गौरवं।
इत्थं च तत्तत्कालीनतत्तद्भूतलादिकं तत्तदभावानां संबंधः॥ अभावं विभजते। अभावस्त्व
ति। अभावत्वं द्रव्यादिषट्कान्योन्याभाववत्त्वं॥ संसर्गेति संसर्गाभावान्योन्याभावभेदादित्यर्थः॥
अन्योन्याभावस्यैकविधत्वात् द्विधा प्रागभावादिसंसर्गाभावं विभजते प्रागभाव इति संस
र्गाभावत्वमन्योन्याभावभिन्नाभावत्वं॥ अन्योन्याभावत्वं तादात्म्यसंबंधावच्छिन्नप्रतियोगि
ताकत्वं विनाश्यभावत्वं प्रागभावत्वं जन्याभावत्वं ध्वंसत्वं नित्यसंसर्गाभावत्वमत्यंताभा
वत्वं यत्र तु भूतले घटादिकमपसारितं पुनरानीतं च तत्र घटकाले घटसंबंधाघट
कालत्वादत्यंताभावस्यानित्यत्वेऽपि घटकाले न घटात्यंताभावबुद्धिः॥ तत्रोत्पादविनाशशालीच
तुर्थोऽयमभाव इति केचित्॥ अत्र ध्वंसप्रागभावाधिकरणे नात्यंताभाव इति प्राचां मतं श्याम
घटे रक्तो नास्ति रक्ते घटे श्यामो नास्तीति धीः प्रागभावध्वंसावगाहते न तु तदत्यंताभावं न विरोधात्

समवायिकारण प्रत्यासंन्नत्वं द्विविधं॥ कार्यैकार्थप्रत्यासत्या कारणैकार्थ
प्रत्यासत्या वा॥ आद्यं यथा॥ घटादिकं प्रति कपालसंयोगादिकं समवायि
कारणं तत्र कार्येण घटेन सह कारणस्य कपालसंयोगस्यैकस्मिन्कपा
ले प्रत्यासत्तिरस्ति॥ द्वितीयं यथा॥ घटरूपं प्रति कपालरूपं समवा म
यिकारणं॥ तत्र घटरूपं प्रति कारणं घटेन सह कपालरूपस्यैकस्मिन्क स
पाले प्रत्यासत्तिरस्ति॥ तथा च क्वचित्समवायसंबंधेन क्वचित्स्वसमवायि
त समवेतत्वसंबंधेनेति फलितार्थः॥ इयं च कार्यैकार्थकारणैकार्थान्यतरप्र
त्यासत्या कारणं ज्ञानादिभिन्नम समवायिकारणमिति समान्यलक्षणं
पर्यवसन्नं॥ आभ्यां समवायिकारणासमवायिकारणाभ्यां परं भिन्नं का
रणं तृतीयं निमित्तकारणमित्यर्थः॥ इदानीमन्यथासिद्धत्वमेव निरूपयति
रूह। येन सहेति॥ यत्कार्यं प्रति कारणस्य पूर्ववृत्तिता येन रूपेण गृह्यते तेन

कार्यंप्रतितद्रूपमन्यथासिद्धमित्यर्थः॥ यथा घटं प्रति दंडत्वं॥ द्वितीय
मन्यथासिद्धमाह॥ कारणमिति॥ यस्य स्वातंत्र्येणान्वयव्यतिरेकौ
नस्तः किंतु कारणमादायान्वयव्यतिरेकौ गृह्येते तदन्यथासिद्धं॥
७ यथा दंडरूपं॥ तृतीयमाह॥ अन्यं प्रतीति॥ अन्यं प्रति पूर्ववृत्तित्वं गृही व
त्वैव यस्य यत्कार्यं प्रति पूर्ववृत्तित्वं गृह्यते तस्य तत्कार्यं प्रत्यन्यथा
सिद्धत्वं यथा घटादिकं प्रत्याकाशस्य॥ आकाशस्य हि घटादिकं
प्रति कारणत्वमाकाशत्वेन स्यात्॥ आकाशत्वं शब्दसमवायिका
रणत्वं॥ अतः शब्दं प्रति जनकत्वं गृहीत्वैव घटादिकं प्रति जनकत्वं
ग्राह्यं॥ अतस्तदन्यथासिद्धं॥ शब्दाश्रयत्वेन तस्य कारणत्वे कान्य ७

वैपरीत्येकिंविनिगमकमितिवाच्यं॥महत्वंतुजातेःकारणतावच्छेदक
८ त्वेलाघवात्॥रासभादिरिति॥यद्घटव्यक्तिंप्रतिरासभस्यनियतपू
र्ववर्तित्वमस्तितत्रापिघटजातीयंप्रतिसिद्धकारणभावैर्दंडादिभिरेव
तद्व्यक्तेरपिसंभवेरासभोन्यथासिद्धइतिभावः॥एतेपंचेति॥एतेषुपंच
स्वन्यथासिद्धेषुमध्येपंचमोन्यथासिद्धआवश्यकस्तेनैवपरेषांच
रितार्थत्वात्॥तथाहि॥दंडादिभिरवश्यक्लृप्तनियतपूर्ववर्तिभिरेवका राम
र्यसंभवेदंडत्वादिकमन्यथासिद्धं॥नचैवंवैपरीत्येकिंविनिगमक
मितिवाच्यं॥दंडत्वस्यकारणत्वेदंडघटितपरंपरायाःसंबंधत्वेगौर
वात्॥एवमन्येषामप्यनेनचरितार्थत्वंसंभवति॥गुणकर्मेति॥अस
मवायिकारणत्वंगुणकर्मभिन्नानांवैधर्म्यंनतुगुणकर्मणोःसाध ५

र्म्यमित्यत्रापितात्पर्यं॥तेनज्ञानादीनामसमवायिकारणत्वविरहेपिनाव्या
प्तिः॥अथवाअसमवायिकारणत्ववृत्तिसत्ताभिन्नजातिमत्वंतदर्थः
अत्रेति॥नित्यद्रव्याणिपरमाण्वाकाशादीनिविहायाश्रितत्वंसाधर्म्य शा
मित्यर्थः॥आश्रितत्वंतुसमवायादिसंबंधेनवृत्तिमत्वंनतुवृत्तित्व
मात्रं॥विशेषणतयानित्यानामपिकालादौवृत्तेः॥इदानींद्रव्यस्यै
वविशिष्यसाधर्म्यंवक्तुमुपक्रमते॥क्षित्यादीनामिति॥क्षितिर्जल
मिति॥पृथिव्यप्तेजोवायुमनसांपरत्वापरत्ववत्वंमूर्तत्वंकर्मवत्वंवे वलं
गवत्वंचसाधर्म्यंनचयत्रघटादौपरत्वमपरत्वंवानोत्पन्नंतत्राव्याप्ति
रिति॥वाच्यं॥परत्वादिसमानाधिकरणद्रव्यत्वव्याप्यजातिमत्वस्य
विवक्षितत्वात्॥मूर्तत्वमपकृष्टपरिमाणवत्वंतच्चैतेषामेवगगनादिप

रिमाणस्यकुत्रोप्युपलब्ध्यभावात्॥ पूर्ववत्कर्मवत्त्वं कर्मसमानाधिकर
णद्रव्यत्वव्याप्यजातिमत्त्वं वेगवद्वृत्तिद्रव्यत्वव्याप्यजातिमत्त्वं बोध्यं॥ काले
९ ति॥ कालाकाशात्मदिशां सर्वगतत्वं॥ सर्वमूर्तसंयोगित्वं॥ परममहत्त्वं
त्वं त्वजातिविशेषोपकृष्टानाश्रयपरिमाणत्वं वा॥ क्षित्यादीति॥ क्षि
त्यप्तेजोवाय्वाकाशानां भूतत्वं॥ तच्च बहिरिन्द्रियग्राह्यविशेषगु
णवत्त्वं॥ अत्र ग्राह्यत्वं लौकिकप्रत्यक्षस्वरूपयोग्यत्वं बोध्यं॥ तेन ज्ञातो
घट इति प्रत्यक्षे ज्ञानस्याप्युपनीतभानविषयत्वात्तद्वति आत्मनि
नातिव्याप्तिः नवा प्रत्यक्षाविषयरूपादिमति परमाण्वादावव्याप्तिः॥
तस्यापि योग्यत्वात्॥ महत्त्वलक्षणकारणान्तरासंनिधानाच्चैव प्रत्य ९
क्षं॥ अथवात्मावृत्तिविशेषगुणवत्त्वं तत्त्वं। चत्वारीति॥ पृथिव्यप्तेजो

थासिद्धिरिति चेत् पंचमी॥ अथवाकाशस्य शब्दं प्रति जनकत्वे किमवच्छे
दकमिति चेत्॥ कवत्वादिकं विशेषपदार्थो वेति॥ चतुर्थमन्यथासि
द्धमाह॥ जनकं प्रतीति॥ यत्कार्यजनकं प्रति पूर्ववर्तित्वं गृहीत्वैव यस्य
यत्कार्यं प्रति पूर्ववर्तित्वं गृह्यते॥ तस्य तत्कार्यं प्रति अन्यथासिद्ध
त्वं॥ यथा कुलालपितुर्घटं प्रति॥ तस्य कुलालपितृत्वेन घटं प्रति जन
कत्वेन्यथासिद्धिः॥ कुलालत्वेन रूपेण जनकत्वे त्वापत्तिः॥ कुलालमा
त्रस्य घटजनकत्वात्॥ पंचमीमन्यथासिद्धिमाहातिरिक्तमिति॥ अव
श्यक्लृप्तनियतपूर्ववर्तिन एव कार्यसंभवे तद्भिन्नमन्यथासिद्धमि
त्यर्थः॥ अत एव प्रत्यक्षे महत्त्वं कारणमनेकद्रव्यत्वमन्यथासिद्धं॥
तत्र हि महत्त्वमवश्यक्लृप्तं॥ तेनानेकद्रव्यत्वमन्यथासिद्धं च

वायुमनोस्पर्शवत्वं॥द्रव्यारंभा इति पृथिव्यप्तेजोवायुषु चतुर्षु द्रव्यारंभकत्वं
नतु द्रव्यानारंभकघटादावव्याप्तिः॥ द्रव्यसमवायिकारणवृत्तिद्र
व्यत्वव्याप्यजातिमत्वस्य विवक्षितत्वात्॥ आकाशशरीरिणामि
ति॥आकाशात्मनामव्याप्यवृत्तिक्षणिकविशेषगुणवत्वं॥आ
काशस्य विशेषगुणः॥शब्दः स चाव्याप्यवृत्तिः॥ यत्किंचिदवछेदे
न शब्द उत्पद्यते तदन्यावछेदेन तदभावस्यापि सत्वात्॥क्षणिकत्वं च तृ
तीयक्षणवृत्तिध्वंसप्रतियोगित्वं॥योग्यविभुविशेषगुणानां स्वोत्तरवृ
त्तिविशेषगुणनाश्यत्वात्॥प्रथमशब्दस्य द्वितीयशब्देनैव नाशः॥एवं ज्ञा
नादीनामिति॥ज्ञानादिकं हिआत्मनि विसोशरीरावछेदेनोत्पद्यते॥
घटाद्यवछेदेन तदभावोस्त्येव॥एवं ज्ञानादिकमपि क्षणद्वयस्थायि॥

दुत्वं चायं व्याप्यवृत्तिविशेषगुणवत्त्वं॥ क्षणिकविशेषगुणवत्त्वं चार्थः॥ पृथिव्या
१० दौरूपादिविशेषगुणोस्तीत्यव्याप्यवृत्तीत्युक्तं॥ पृथिव्यादावव्याप्यवृत्तिः
संयोगादिरस्तीति विशेषगुणेत्युक्तं॥ न च रूपादीनामपि कदाचित्तृतीय
क्षणे नाशसंभवात्क्षणिकविशेषगुणवत्त्वं सिध्यादशचातिव्याप्तमिति वा
च्यं॥ चतुःक्षणवृत्तिजन्यावृत्तिजातिमद्विशेषगुणवत्त्वस्य तदर्थत्वात्॥ अ
पेक्षाबुद्धिः क्षणत्रयं तिष्ठति॥ क्षणचतुष्टयं तु न किमपि ज्ञानादिकं ति
ष्ठति॥ रूपत्वादिकं तु क्षणचतुष्टयस्थाय्यपि रूपादौ वर्त्तत इति तद्व्यु
दासतः॥ ईश्वरज्ञानस्य चतुःक्षणवृत्तित्वात्तद्व॥ ज्ञानत्वस्य तद्वृत्तित्वा
ज्जन्येत्युक्तं॥ यद्याकाशजीवात्मनोः साधर्म्यं तदा जन्येति न देयं इदं फल १०
दिकमादाय लक्षणसमन्वयात्॥ परममहत्त्वस्य तादृशगुणत्वाद्वतु

र्थक्षणेद्वित्वादीनामपिनाशाभ्युपगमात्द्वित्वादीनामपितथात्वात्तदुद्धा
रणायविशेषेति।त्रिक्षणवृत्तित्वंवावाच्यं॥इच्छादिकमादायात्मनिलक्ष
णसमन्वयात्॥रूपेति।पृथिव्यप्तेजसांरूपवत्त्वंद्रवत्वंचलंप्रत्यक्षविषय
त्वंचेत्यर्थः॥नचचक्षुरादीनांभर्जनकपालस्थवह्नेरूष्मणश्चरूपव
त्वेकिंमानमितिवाच्यं।तत्रापितेजस्त्वेनरूपानुमानात्।एवंवाय्वानीतपृ
थिवीजलतेजोभागानामपिपृथिवीत्वादिनारूपानुमानंबोध्यं॥नचघ
टादौद्रुतसुवर्णभिन्नेतेजसिचद्रवत्ववत्त्वमव्याप्तमितिवाच्यं॥द्रवत्व
वृत्तिद्रव्यत्वव्याप्यजातिमत्त्वस्यविवक्षितत्वात्।घृतजतुप्रभृति
षुद्रव्येषुजलद्रुतसुवर्णादौतेजसिचद्रवत्त्वसत्त्वात्।तत्रपृथिवीत्वादि

सत्तात्तदादायसर्वत्रसमन्वयः॥नचप्रत्यक्षविषयत्वंपरमाण्वादावव्याप्तमितिव्याप्तं
११ चरूपादावितिवाच्यं।चाक्षुषप्रत्यक्षविषयवृत्तिद्रव्यत्वव्याप्यजातिमत्त्वस्यविवक्षि
तत्वात्॥आत्मन्यतिव्याप्तिवारणायचाक्षुषेति।गुरुणीति।गुरुत्ववत्वंरसवत्वंचपृथिवी
जलयोरित्यर्थः।नचघ्राणेंद्रियाणांवाय्वानीतपार्थिवभागानांचरसादिमत्वेकिं
मानमितिवाच्यं।तत्रापिपृथिवीत्वादिनातदनुमानात्।द्वयोरिति।पृथिवीते
जसोरित्यर्थः॥नचनैमित्तिकद्रवत्ववत्वंघटादौवह्न्यादौवाव्याप्तमितिवा
च्यं।नैमित्तिकद्रवत्वसमानाधिकरणद्रव्यत्वव्याप्यजातिमत्त्वस्यविवक्षितत्वा
त्।आत्मानइति।पृथिव्यप्तेजोवाय्वाकाशात्मनांविशेषगुणवत्वमित्यर्थः॥यदु
क्तमिति।ज्ञेयत्वादिकंविहायेतिवाच्यं।तत्तुनकस्यापिवैधर्म्यंकेवलान्वयित्वात्॥
नवेति।संख्यादयःपंच।खेआकाशेसाधर्म्यवैधर्म्येनिरूप्यसंप्रतिप्रत्येकंनिरूपय ११

ति। तत्र क्षितिरित्यादीनां गंधहेतुरिति। गंधसमवायिकारणमित्यर्थः। यद्यपि गंधवत्त्वमात्रं लक्ष
णमुचितं। तथापि पृथिवीत्वजातौ प्रमाणोपन्यासाय कारणत्वमुपन्यस्तं। तथाहि पृथिवीत्वं गंधसमवा
यिकारणतावच्छेदकतया सिद्ध्यति। अन्यथा गंधत्वावच्छिन्नस्याकस्मिकत्वापत्तेः। न च पाषाणादौ
गंधाभावाद्गंधवत्त्वमव्याप्तमिति वाच्यं। तत्रापि गंधसत्त्वात्। अनुपलब्धिस्तु अनुद्भूतत्वेनाप्युपपद्य पु
ते। कथमन्यथा तद्भस्मनि गंध उपलभ्यते। भस्मनो हि पाषाणध्वंसजन्यत्वात् पाषाणो
पादोनोपादेयत्वं सिध्यति। यद्द्रव्यं यद्द्रव्यध्वंसजन्यं तत्तदुपादानोपादेयमिति व्याप्तेः। ख
दृष्टं चैतत् खंडपटमहापटध्वंसजन्ये। इत्थं च पाषाणपरिमाणोः पृथिवीत्वात्तज्जन्य
पाषाणस्यापि पृथिवीत्वं। तथा च तस्यापि गंधवत्त्वे बाधकाभावः॥ नानारूपेति। शु
क्लनीलादिभेदेन नानाजातीयं रूपं पृथिव्यामेव वर्तते॥ न तु जलादौ तत्र शुक्लस्यै
व सत्त्वात्॥ पृथिव्यां तु एकस्मिन्नपि धर्मिणि पाकवशेन नानारूपसंभवात्॥ न च
२ इति वा २ यत्र नानारूपं नोत्पन्नं तत्राव्याप्तिः रूपद्वयवृत्तिद्रव्यत्वव्याप्यजातिमत्त्वस्य रूपना
च्यं नात्ववृत्तिद्रव्यत्वव्याप्यजातिमत्त्वस्य वा विवक्षितत्वात्। वैशेषिकं नयं पृथिवीप

रमाणेऽकल्पनाशस्यरूपांतरस्यचसत्वात्॥व्याप्यनयेघटादावपितत्सत्वा
१२ ल्लक्षणस्यसमन्वयः॥षड्विधइति॥मधुरकटुकषायादिभेदेनषड्विधोरसः॥
सपृथिव्यामेवजलेतुमधुरएवरसः॥अत्रापिपूर्ववत्रसत्वव्याप्यवद्वृत्तिद्र
व्यत्वव्याप्यजातिमत्वंलक्षणंपर्यवसेयं॥गंधास्त्वितिद्विविधइतिवस्तुस्थि
तिमात्रं॥नतुद्विविधगंधवत्वमपिलक्षणं॥द्विविधत्वस्यव्यर्थत्वात्॥द्वै
विध्यंचसौरभ्यासौरभ्यभेदेनबोध्यं॥स्पर्शइति॥तस्यापृथिव्योः
अनुष्णाशीतस्पर्शोनचैववायावपिवर्त्ततइत्युक्तं॥पाकजइति॥
इत्थंचपृथिव्यास्पर्शोऽनुष्णाशी॥तइतिज्ञापनार्थंतदुक्तं॥पाकज
स्पर्शमात्रंलक्षणं॥अधिकस्यवैयर्थ्यात्॥यद्यपिपाकजस्पर्शः १२

६ यथैकस्यकेशस्यदूरेअप्रत्यक्षत्वेपितत्समूहस्यप्रत्यक्षत्वं × ६

पटादौनास्ति तथापि पाकजस्पर्शवद्वृत्तिद्रव्यत्वव्याप्यजातिमत्त्वमर्थो बोध्यः।। नित्येति।
सापृथिवी द्विधा। नित्यानित्या चेत्यर्थः। अणुलक्षणा परमाणुरूपा पृथिवी नित्या। तद
न्या परमाणुभिन्ना पृथिवी द्व्यणुकादिः सर्वाप्यनित्येत्यर्थः। सैवाऽनित्या पृथिव्य
वयवतीत्यर्थः। नन्ववयविनि किं मानं। परमाणुपुंजैरेवोपपत्तेः। न च परमाणुनामतींद्रिय
त्वाद्घटादेः प्रत्यक्षत्वं न स्यादिति वाच्यं। एकस्य परमाणोरप्रत्यक्षत्वेपि तत्समूहस्य प्रत्य
क्षत्वं। नन्वेवं एकः स्थूलो घट इति बुद्धेरनुपपत्तिरिति वाच्यं। एको महान्धान्यराशिरितिवदुप
पत्तेः। मैवं। परमाणोरतींद्रियत्वे न तत्समूहस्यापि प्रत्यक्षत्वायोगात्। दूरस्थकेशस्तु नातीं
द्रियः। सान्निधाने तस्यैव प्रत्यक्षत्वात्। न च तथातींद्रियपरमाणुपुंजस्यासन्नत्वान्नप्रत्यक्षत्ववि
रोध इति वाच्यं। अदृश्यस्य दृश्यानुपादानत्वात्। अन्यथा चक्षुरूष्मादिसंततो कदाचिद्दृ
श्यत्वप्रसंगात्। न चास्ति तु संतेलादौ कथमदृश्यदहनसंतते दृश्यमानदहनोत्पत्तिरिति
वाच्यं। तत्र तदंतःपातिभिर्दृश्यदहनावयवैः स्थूलदहनोत्पत्तेरुपगमात्। न चादृश्येयन

सिध्दां॰ x अंत्यावयविमात्रवृत्तिचेष्टावद्वृत्तिजातिमत्त्वं वा x ४

मुक्ता॰ य २

मिति चेत्। भग्नक्षतसंरोहणादिना तदुन्नयनात्। यदि हस्तादौ शरीरव्यवहारो न
१४ भवति तदा अंत्यावयवित्वेन विशेषणीयं। न च यत्र शरीरे चेष्टा न जाता तत्राव्याप्तिरि
ति वाच्यं। तादृशे प्रमाणाभावात्। चेष्टावदंत्यावयविवृत्तिद्रव्यत्वव्याप्यजाति
मत्त्वं वा लक्षणं मनुष्यत्वचैत्रत्वादिजातिमादाय लक्षणसमन्वयः। न च नृसिंहश
रीरे कथं लक्षणसमन्वयस्तत्र नृसिंहत्वस्यैकव्यक्तिवृत्तितया जातित्वाभावात्।
जलीयतैजसशरीरवृत्तितया पार्थिवत्वस्यापि जातित्वाभावादिति वाच्यं। कल्पभेदेन नृ=
सिंहशरीरस्य नानात्वेन नृसिंहत्वजात्या लक्षणसमन्वयात्। इंद्रियमिति। घ्राणेंद्रियं
पार्थिवमित्यर्थः। पार्थिवत्वं कथमिति चेत्। इत्थं घ्राणेंद्रियं पार्थिवं रूपादिमध्ये गंधस्यै
वव्यंजकत्वात्। कुंकुमगंधाभिव्यंजकघृतवत्। न च दृष्टांते स्वीयरूपादिव्यंजक=
त्वादसिद्धिरिति वाच्यं। परकीयरूपाद्यव्यंजकत्वस्य तदर्थत्वात्। न च नवशरावगंध १४

सिन्मु

स्प

स्यात्तत्र जन्यस्नेहाभावात्। तस्यापि तत्स्वरूपयोग्यत्वे फलावश्यंभावनियमादिति
१५ चेन्न। जन्यस्नेहजनकतावच्छेदिकायाः जन्यजलत्वजातेः सिद्ध्यातदवच्छिन्नजनक
तावच्छेदकतया जलत्वजातिसिद्धेः। शुक्लरूपमेव जलस्येति दर्शयितुमुक्तं
वर्णः शुक्ल इति। ननु शुक्लरूपवत्वं लक्षणं। अथवा नैमित्तिकद्रवत्ववद्वृत्ति
रूपवद्वृत्तिद्रव्यत्वसाक्षाद्व्याप्यजातिमत्वं अभास्वरशुक्लेतररूपासमाना
धिकरणरूपवद्वृत्ति [illegible] जातिमत्वं तदर्थः। रसस्पर्शाविति। जलस्य मधुर एव रसः। शीत एव स्पर्शः। तिक्तवद्वृत्तिमधुरवद्वृत्तिद्रव्यत्व व
साक्षाद्व्याप्यजातिमत्वं तदर्थः। तेन शर्करादौ नातिव्याप्तिः। शीतेति तत्स्प
र्शवद्वृत्ति [illegible] स्पर्शवद्वृत्तिजातिमत्वं तदर्थः। ननु शुक्लरूपमेवेति १५

३

कुतः। कालिंदीजलादौ नीलिमोपलब्धेरिति चेन्न नीलजनकतावच्छेदिका
याः पृथिवीत्वजातेरभावात्। जले नीलरूपासंभवात्। कालिंदीजले नीलत्वप्रती ल
तिस्त्वाश्रयौपाधिकी। अत एव वियति विक्षेपे धवलिमोपलब्धिः। अथ ज
ले माधुर्ये किं मानं नहि प्रत्यक्षेण कोपि रसस्तत्रानुभूयते। न च नारिकेलज
लादौ माधुर्यमुपलभ्यत एवेति वाच्यं। तस्याश्रयौपाधिकत्वात्। अन्यथा जं
र बीरकरवीरसादावम्लोपलब्धेरम्लादिमत्वस्यापि दित्ति चेन्न। हरीत त्रे
क्यादिभक्षणस्य जलरसव्यंजकत्वात्। न च हरीतक्यामेव जले रसा श्र
द्रसांतरोत्पत्तिरिति वाच्यं। कल्पनागौरवात्। पृथिवीत्वस्याम्लादिज
नकतावच्छेदकत्वात् जले नाम्लादिकं। जंबीररसादौ त्वाश्रयौपाधिकी।

म्रि ४

सि॰मु

तथाप्रतीतिः। एवं जन्यस्पर्शीत्। तत्स्पर्शजनकतावच्छेदकं जलत्वं जन्यजलत्वं वा
१६ बोध्यं। दृष्टं चैतत् नादेशे त्योपलब्धिश्चंदनांतरवर्तिशीततरसलिल
स्य तेजःसंयोगाज्जले औष्ण्यप्रतीतिरौपाधिकी स्फुटैव तत्र पाकासंभ
वात्। स्नेहस्तत्रेति। घृतादावपि तदंतर्वर्तिजलस्यैव स्नेहः। जलस्य स्ने
हसमवायिकारणत्वात्तेन जले एव स्नेह इति मंतव्यं। द्रवत्वमिति। सां
ल सिद्धिकद्रवत्वं जातिविशेषः प्रत्यक्षसिद्धः। तज्जनकतावच्छेदकमपि
तदेवेति भावः। तैलादावपि जलस्यैव द्रवत्वं स्नेहप्रकर्षेण च दहनानुकू
ल्यमिति वक्ष्यति। प्रथमवदिति। पृथिव्या इवेत्यर्थः। तथा हि। जलं द्विविधं।
नित्यमनित्यं च। परमाणुरूपं हि नित्यं। द्व्यणुकादिकं सर्वमनित्यमवय १६

इ

व्यंजकं जले अनेकांतिकमिति वाच्यं। तस्य सुरभिरसाभिव्यंजकत्वात्। यद्वा परकीयेति नेदं वं।
वायूपनीतसुरभिभागस्य दृष्टांतत्वसंभवात्। न च घ्राणेंद्रियसंनिकर्षस्य गंधमात्रव्यंजकत्वा
व्य त्। तत्रैव व्यभिचार इति वाच्यं। द्रव्यत्वे सतीति विशेषणात्। विषय इति उपभोगसाधनं हि वि
षयः। सर्वमेव कार्यजातमदृष्टाधीनं यत्र कार्यं तददृष्टाधीनं। तत्तदुपभोगं साक्षात्परंप
रया वा जनयत्येव। नहि बीजप्रयोजनाभ्यां विना कस्यचिदुत्पत्तिरस्तीति तद्द्व्यणुकादि
विषयेः कं ब्रह्मांडांतं सर्वमेव विषयो भवति। शरीरेंद्रिययोर्विषयत्वेऽपि प्रकारांतरेण उपन्यासः।
शिष्यबुद्धिवैशद्यार्थः। जलं निरूपयति वर्णः शुक्ल इति। स्नेहसमवायिकारणता
वच्छेदकतया जलत्वजातिः सिध्यति। यद्यपि स्नेहत्वं नित्यानित्यवृत्तितया
नकार्यतावच्छेदकं। तथापि जन्यस्नेहत्वं तथा बोध्यं। अथ परमाणौ जलत्वं न

वसमवेतं च। अनित्यमपि त्रिविधं। शरीरेंद्रियविषयभेदात्। किंतु पृथिवी
तोयोर्विशेषस्तमाह किलेति। अयोनिजमिति। अयोनिजमेवेत्यर्थः। जलीयं शरी
रमयोनिजं वरुणलोके प्रसिद्धमिति। इंद्रियं रसनं जलीयमित्यर्थः। तथाहि रस॰
नं जलीयं गंधाद्यव्यंजकत्वे सति रसव्यंजकत्वात् सक्तुरसाभिव्यंजकोदकवत्। २
रसनसंनिकर्षे व्यभिचारवारणाय द्रव्यत्वं देयं। विषयं दर्शयति। सिंधुरिति॥ हिमादि
सिंधुः समुद्रः। हिमं तुषारः। आदिपदात् सरित्कासारकादिः सर्वोग्राह्यः। न च हि
मकरकयोः काठिण्यात् पार्थिवत्वमिति वाच्यं ऊष्मणा विलीनयोस्तयोर्जलत्व
स्य प्रत्यक्षसिद्धत्वात्। यद्द्रव्यं यद्द्रव्यध्वंसजन्यमिति व्याप्तेर्जलोपादानोपा
देयत्वसिद्धेः अदृष्टविशेषेण द्रवत्वप्रतिरोधात् करकायां काठिण्यप्रत्यय

स्यभ्रांतत्वात्। तेजो निरूपयति। स्पर्श उष्ण इत्यादिना। उष्णत्वं स्पर्शनिष्ठा जाति
१७ स्पर्शत्व विशेषः प्रत्यक्षसिद्धः। इत्थं च जन्योष्णसमवायिकारणतावच्छेदकं तेजस्त्वं जातिविशे
षः। तस्य परमाणुवृत्तित्वं तु जलत्वस्येवानुसंधेयं। न चोष्णस्पर्शवत्त्वं चंद्रकिरणाद
वव्याप्तमिति वाच्यं। तत्राप्योष्णस्य सत्वात्। किंतु तदंतःपातिजलस्पर्शेनाभिभ
वादग्रहः। एवं रत्नकिरणादौ पार्थिवस्पर्शेनाभिभवात् चक्षुरा
दौ चानुद्भूतत्वादग्रहः। रूपमित्यादि। वैश्वानरे मरकतकिरणादौ च पा
र्थिवरूपेणाभिभवाच्छुक्लरूपाग्रहः। तद्रूपाग्रहे धर्मिणोऽपि चाक्षुषत्वं न स्या
दिति चेन्न। अन्यदीयरूपेण वधर्मिणोग्रहसंभवात्। शंखस्य पित्तपी
तिम्ना। वह्नेस्तु शुक्लरूपं नाभिभूतं किंतु तदीयशुक्लत्वमभिभूतमित्य १७

न्ये। नैमित्तिकमिति। सुवर्णादिरूपे तेजसि तत्सत्त्वात्। न चैवं नैमित्तिकद्रवत्वलक्ष
णं दहनादावव्याप्तमतिव्याप्तं च घृतादाविति वाच्यं। पृथिव्यवृत्ति नैमित्तिकद्र
वत्ववद्वृत्तिजातिमत्वस्याविवक्षितत्वात्। पूर्ववदिति। जलस्येवेत्यर्थः। तथा
हि। तद्द्विविधं। नित्यमनित्यं च परमाणुरूपं नित्यं तदन्यदनित्यमवयवि च। त
च्चैत्रेधा। शरीरेंद्रियविषयभेदात्। शरीरमयोनिजमेवेति। तच्च सूर्यलो
कादौ प्रसिद्धं। अत्रैको विशेषस्तमाह। इंद्रियमिति। चक्षुस्तैजसं परकी
यस्पर्शाव्यंजकत्वे सति परकीयरूपव्यंजकत्वात् प्रदीपवत्। प्रदीप
स्य स्वीयस्पर्शाव्यंजकत्वादाद्यं परकीयेति। मण्यादेः स्वीयरूपव्यंजकत्वा
द्व्यभिचारवारणाय द्वितीयं परकीयेति। अथवा प्रभाया एव दृष्टांत

सि०मु

त्वसंभवादंघपरकीयं नदेयं। चक्षुःसंन्निकर्षेव्यभिचारवारणाय द्रव्यत्वंदे
१८ यं।विषयंदर्शयति।वह्नीति। ननुसुवर्णस्यतैजसत्वेकिंमानमितिचेन्न।सु
वर्णंतैजसं।असतिप्रतिबंधकेअत्यंतानलसंयोगेप्यनुछिद्यमानद्रवत्वा
धिकरणत्वात्।यन्नैवं तन्नैवंयथापृथिवी।नचाप्रयोजकं।पृथिवीद्रवत्व
स्यजलद्रवत्वस्य चाग्निसंयोगिनाश्यत्वात्।ननुपीतिमगुरुत्वाश्रयस्य
पार्थिवभागस्यापि तदानींद्रुतत्वात्तेनव्यभिचारइति चेन्न।जलमध्य
स्थमषीभागस्येव तस्याद्रुतत्वात्।अपरेतुपीतिमाश्रयस्यात्यंताग्निसंयोगे
पिरूपापरावृत्तिदर्शनात्तत्प्रतिबंधकं विजातीयरूपप्रतिबंधकद्रवद्रव्य
कल्प्यते। तथाहि।अग्निसंयोगी।पीतिमगुरुत्वाश्रयः विजातीयरूपप्रति १८

२ विजातीय २

बंधकद्रवद्रव्यसंयुक्तः।अत्यंताग्निसंयोगेपिपूर्वरूपविजातीयरूपानधिक
रणत्वात्।जलमध्यस्थपीतपटवत्।तस्यचपृथिवीजलभिन्नस्यतेजस्त्व
नियमात्।वायुंनिरूपयति।अपाकज इति।अनुष्णाशीतस्पर्शस्य
पृथिव्यामपिसत्वादतउक्तमपाकज इति।अपाकजस्पर्शस्यजलादावपि
सत्वादतउक्तमनुष्णाशीत इति।एतेनवायवीयोविजातीयस्पर्शोदर्शि
तः।तज्जनकतावच्छेदकंवायुत्वमितिभावः।एषवायुस्पर्शादिलिंगकः॥
वायुर्हिस्पर्शशब्दधृतिकंपैरनुमीयते।विजातीयस्पर्शेनविलक्षणशब्द
नतृणादीनांधृत्याशाखादीनांकंपेनचवायोरनुमानात्।यथाचवायु
नप्रत्यक्षस्तथाग्रेवक्ष्यते।पूर्ववदिति।वायुर्द्विधा।नित्यानित्यश्च।पर

४ अत्रयोर्विशेषस्तमाह॥ देहव्यापीति ४

माणुरूपो नित्यः। तदन्यो ऽनित्यः। समवेतश्च सोपि त्रिविधः। शरीरेंद्रिय
१९ विषयभेदात्। तत्र शरीरमयोनिजं पिशाचादीनां परं तु जलीयतैजसवाय
वीयशरीराणां पार्थिवभागोपष्टंभाद्भोगक्षमत्वं। जलादीनां प्राधान्याज्जली
यत्वादिकमेवेति। शरीरव्यापकं स्पर्शग्राहकमिंद्रियं त्वक्। तच्च वायवीयं
रूपादिष्वभिध्ये स्पर्शस्यैव व्यंजकत्वात्। अंगसंगिसलिलशैत्यव्यंजक
व्यजनवायुवत्। विषयं दर्शयति। प्राणादिरिति। आकाशं निरूपयति। आ प्रा
काशस्येति। आकाशकालदिशामेकैकव्यक्तिकत्वादाकाशत्वादिकं
न जातिः। आकाशत्वं शब्दाश्रयत्वं। वैशेषिककथनं तु विशेषगुणांतर
व्यवच्छेदाय। एतन्न प्रमाणमपि दर्शितं। तथा हि शब्दो गुणः चक्षुर्ग्रहणा १९

४ यद्यप्यनित्यो वायुश्चतुर्विधः॥ तस्याश्चातुर्विध्यं प्राणादिभेदादित्युक्तमाकरे ४

योग्यबहिरिंद्रियग्राह्यजातिमत्वात्।स्पर्शवत्।शब्दोद्रव्यसमवेतोगुण
त्वात्इत्यनुमानेनशब्दस्यद्रव्यसमवेतत्वसिद्धौशब्दोनस्पर्शवद्विशेषगु
णःअग्निसंयोगाअसमवायिकारणत्वाभावेसतिअकारणगुणपूर्वकप्र
त्यक्षत्वात्।सुखवत्।जलपरमाणुरूपादौव्यभिचारवारणायप्रत्यक्षेति।
नदिक्कालमनोगुणः।विशेषगुणत्वात्।नात्मविशेषगुणःबहिरिंद्रियग्राह्य
त्वात्रूपवत्।इत्थंचशब्दाधिकरणनवमंद्रव्यंगगननामकंसिध्यतिवा
य्ववयवेषुसूक्ष्मशब्दक्रमेणवायोःकारणपूर्वकःशब्दमुत्पद्यतामिति
वाच्यं।अयावद्द्रव्यभावित्वेनवायुविशेषगुणत्वाभावात्।तत्रचशरीर
स्यविषयस्याचाभावादिंद्रियंदर्शयति।इंद्रियमिति।नन्वाकाशत्व

घवादेकं सिद्धं। श्रोत्रं पुरुषभेदाभिन्नं। कथमाकाशस्यादल आह ए
कः सन्नपीत्यादि आकाश एकः सन्नपि उपाधेः कर्णशष्कुल्याः भेदाद्भिन्नं भि
न्नं श्रोत्रात्मकं भवतीत्यर्थः। कालं निरूपयति। जन्यानामिति। तत्र प्रमाणं द
र्शयितुमाह। जगतामिति। तथाहि इदानीं घट इत्यादि प्रतीतिः सूर्यपरिस्प
न्दादिकं विषयीकरोति तत्र सूर्यपरिस्पन्दादिना घटादेः संबंधो वाच्यः। स
च संयोगादिर्न भवतीति काल एव संबंधघटकः कल्प्यते। इत्थं च तस्याश्र
यत्वमेव सम्यक् प्रमाणांतरं वदति परापरत्वेति। परत्वापरत्वबुद्धेरसाधारणं
निमित्तं काल एव परत्वापरत्वयोरसमवायिकारणसंयोगाश्रयो लाघ
वादतिरिक्तः कल्प्यत इति भावः। न चैकस्य कालस्य सिद्धौ क्षणादिव्यास

वर्षादिसिमयभेदेनस्यात्तदेव आह। क्षणादिरिति। कालस्त्वेकोपितत्रोपाधि
भेदात्क्षणादिव्यवहारविषयः। उपाधिस्तुस्वजन्यविभागप्रागभावावच्छिन्नं
कर्मपूर्वसंयोगावच्छिन्नविभागोवा। पूर्वसंयोगनाशावच्छिन्नोविभागोवाउ वा॥
त्तरसंयोगावच्छिन्नंकर्मवानचउत्तरसंयोगानंतरक्षणव्यवहारोनस्यादि
२ तिवाच्यं। कर्मांतरस्यसत्वादिति। महाप्रलयेतुक्षणव्यवहारोयद्यस्तितदा
अनापत्याध्वंसेनैवोपपादनीयइति। दिशंनिरूपयति। दूरांतिकेतिकेति।
दूरत्वमांतिकत्वंचदैशिकपरत्वमपरत्वंबोध्यं। तद्बुद्धेःसाधारणंबीजं
दिगेवदैशिकपरत्वापरत्वयोरसमवायिकारणसंयोगाश्रयतयादि
क्सिद्धासीतिभावः। ननुएकैवदिग्यदितदाप्राचीप्रतीच्यादिव्य

वहाराःकथंउपपद्यंतामतस्तदुक्तं। उपाधीति। यदायत्पुरुषस्योदयगिरिसं
२१ निहितायांदिक्तदातत्पुरुषस्यसाप्राची। एवंउदयगिरिव्यवहिताचप्र
तीची। एवं [illegible] तत्पुरुषीयसुमेरुसंनिहितादिगुदीची। तद्व्यवहि
तात्ववाची। सर्वेषामेववर्षानांमेरुरुत्तरतस्थितइतिनियमात्। आत्मा
नंनिरूपयति। आत्मेति। आत्मत्वजातिस्तुसुखदुःखादिसमवायिका
रणतावछेदकतयासिध्यति। ईश्वरेपिसाजातिरस्त्येवदृष्टादिरूप
कारणाभावान्नसुखदुःखाद्युत्पत्तिः। नित्यस्वरूपयोग्यस्यफलावश्यं
भावइत्यस्याप्रयोजकत्वात्। परेतुईश्वरेसाजातिर्नास्त्येव। प्रमाणाभावात्।
नचदशमद्रव्यत्वापत्तिःज्ञानवत्त्वेनविभजनादित्याहुः। अधिष्ठाता २१

इंद्रियाणां शरीरस्य च साक्षात्परंपरया वा चैतन्यसंपादकः। यद्यप्यात्मनि
अहं जाने अहं जानामि अहं सुखीत्यादिप्रत्यक्षविषयत्वमस्त्येव। तथापि विप्रतिप 55
त्तिप्रथमत एव शरीरादिभिन्नस्तस्मिन्लौकिकगोचर इति प्रदीपादिवन्न शक्य
त इत्यतः प्रमाणं दर्शयति। करणं हीति। वास्यादीनां छिदादिकरणानां कर्ता
रमंतरेण फलाभावदर्शनाभाव इत्यस्याभिप्रायः उक्तमुपधानं दृष्टं एवं चक्षुरा
दीनां ज्ञानकरणानां फलोपधानमपि कर्तारमंतरेणानुपपद्यत इत्यति
रिक्तः कर्ता कल्प्यते। ननु शरीरस्यैव कर्तृत्वमस्तु अत आह शरीरस्येति।
ननु चैतन्यं ज्ञानादिकमेवमुक्तात्मनां त्वन्मत इव मृतशरीराणामपि
55 तदभावे न क्षतिः। प्राणाद्यभावस्य न ज्ञानाद्यभावस्य सिद्धेरिति चेन्न

शरीरस्य चैतन्ये बाल्ये विलोकितस्य स्थविरे स्मरणानुपपत्तेः। शरीरा
२२ णामवयवोपचयापचयैरुत्पादविनाशशालित्वात्। न च पूर्वशरीरो
त्पन्नसंस्कारेण द्वितीयशरीरे संस्कार उत्पद्यत इति वाच्यं। अनन्तसं
स्कारकल्पनागौरवात्। एवं शरीरस्य चैतन्ये बालकस्य प्रवृत्तिर्न स्या
त्। इष्टसाधनताज्ञानस्य तद्धेतुत्वात्। तदानीमिष्टसाधनत्वानुभावका
भावात्। मन्मते तु जन्मान्तरानुभूतेष्टसाधनत्वस्य तदानीं स्मरणादेव
प्रवृत्तिः। न च जन्मान्तरानुभूतमन्यदपि स्मर्यतामिति वाच्यं। उद्बोधकाभा
वात्। अत्र त्वनायत्त्या जीवनादृष्टमेवोद्बोधकं कल्प्यते। इयं च संसार
स्यानादितयात्मनः अनादित्वसिद्धौ भावनादिभावस्य नाशासंभवान्नि २२

सा त्यत्वं संभवतीति बोध्यं। ननु चक्षुरादीनां ज्ञानादौ करणत्वं कर्तृत्वं चास्तु वि
रोधकाभावादत आह। तथात्वं चेदिति। तथात्वं चैतन्यं उपघाते नाशे सति
अर्थात् चक्षुरादीनामेव कथमिति। पूर्वं चक्षुषा साक्षात्कृतानां चक्षुषाभावे
स्मरणं न स्यात्। अनुभवितुरभावादन्यस्यानुभूतस्यान्येन स्मरणासंभ
वादनुभवस्मरणयोः सामानाधिकरण्येन कार्यकारणभावादिति भावः।
ननु चक्षुरादीनां चैतन्यं मास्तु मनसस्तु नित्यस्य चैतन्यं स्यादत आह। म
नोऽपीति। मनसोऽणुत्वात् प्रत्यक्षे च महत्त्वस्य हेतुत्वान्मनसि ज्ञानसुखादि
सत्वे तत्प्रत्यक्षानुपपत्तेरित्यर्थः। यथा च मनसोऽणुत्वं तथाग्रे वक्ष्यते। नन्व
स्तु विज्ञानमेवात्मा। तस्य स्वतः प्रकाशरूपत्वाच्चेतनत्वम्। ज्ञानसुखा

धिकं तस्यैवाकारविशेषः। तस्यापि भावत्वाद्ये वक्ष्यणिकत्वं। पूर्वपूर्वविज्ञा
नस्योत्तरविज्ञानेहेतुत्वात्सुषुप्तावप्यालय विज्ञानधारा निराबाधे
व॥ मृगमदवासनायावसन इव पूर्वविज्ञानजनितसंस्काराणामुत्तरोत्त
रविज्ञाने संक्रान्तत्वान्नानुपपत्तिः स्मरणादेरिति चेन्न। तस्य जगद्वि
षयत्वे सार्वज्ञापत्तिः यत्किंचिद्विषयत्वे विनिगमकाभावात्सुषुप्तावपि
विषयावभासप्रसंगा॥ तदानीं निराकारा चित्संततिरनुवर्तत इ
ति चेन्न तस्य प्रकाशत्वे प्रमाणाभावात्। अन्यथा घटादीनामपि ज्ञानत्वा
पत्तिः॥ चेष्टापत्तिर्विज्ञानव्यतिरिक्तवस्तुनोभावादिति वाच्यं। घटादेरनु
भूयमानस्यापलपितुमशक्यत्वात्। आकारविशेष एवायं विज्ञान

स्येतिचेत्तत्किमयमाकारोतिरिच्यतेविज्ञानात्तर्हिसमायातंविज्ञानव्यति
रिक्तेनःनातिरिच्यतेचेत्तर्हिसमूहालंबनेनीलाकारोपिपीताकारस्यात्
स्वरूपतोविज्ञानस्याविशेषात्।आपाद्यरूपोनीलत्वादिर्विज्ञाधर्मइ
तिचेन्न।नीलत्वादीनांविरुद्धानामेकस्मिन्नेसमावेशात्।इतरथाविरो
धावधारणस्यैवदूरूपपादत्वात्।नवावासनासंक्रमःसंभवति।मातृ
पुत्रयोरपिवासनासंक्रमप्रसंगात्।नचोपादानोपादेयभावोनियाम
कइतिवाच्यं।वासनायाःसंक्रमस्यासंभात्।उत्तरस्मिन्नुत्पत्तिरेवसंक्र वा२
मइतिचेन्न।तदुत्पादकाभावात्।चित्तावोमैत्पादकत्वेसंस्कारानंत्य
प्रसंगः।क्षणिकविज्ञानेष्वतिशयविशेषःकल्प्यतइतिचेन्न।मानाभा

दा२

२९ वात्।कल्पनागौरवाच्च।एतेनक्षणिकशरीरेष्वेवचैतन्यमितिप्रत्युक्तं।गौर
वादतिशयमानाभावात् बीजानामपिसहकारिसमवधानाभ्यामेवाप
त्तेः।कुर्वद्रूपत्वाकल्पनात्।अस्तुतर्हिक्षणिविज्ञानेगौरवान्नित्यविज्ञानमे
वात्मा।अविनाशीवाअरेयमात्मासत्यंज्ञानमनंतंब्रह्मेत्यादिश्रुतेरिति
चेन्न।तस्यसर्वविषयत्वासंभवस्यदर्शितत्वान्निर्विषयस्यज्ञानत्वमाना
भावात्सविषयस्याप्युत्पत्त्युभयाद्दतोज्ञानभिन्नोनित्यआत्मेतिसिद्धं।स
त्यंज्ञानमितिब्रह्मपरंजीवेषुनोपयुज्यते।ज्ञानाज्ञानसुखित्वादिभि
र्जीवानांभेदप्रसिद्धेःसुतरामीश्वरभेदः।अन्यथाबंधमोक्षानुपपत्तेः। राम
योपीश्वराभेदबोधकोवेदःसोपितदंशभेदेनतदीयत्वंप्रतिपादयन्

स्मोति। अभेदभावनयैवपतितव्यमितिवदंति। अतएवसर्वस्वात्मानःसमर्पिता।
इतिश्रूयते। मोक्षदशायामज्ञाननिवृत्तावभेदोजायतइत्यपिन। भेदस्यानित्य
त्वेननाशायोगात्। भेदनाशेपिव्यक्तिद्वयंस्थास्यत्येव। नचद्वित्वमपिनश्यतीति
वाच्यं। तदानिर्धर्मकेब्रह्मणिसत्यत्वाभावेपिसत्यस्वरूपत्वादितिवत्द्वित्वाभा
वेपिद्वयात्मकोतावितिसुवचत्वात्। मिथ्यात्वाभावोधिकरणात्मकस्तत्र
सत्यत्वमितिचेन्न। एकत्वाभावोव्यक्तिद्वयात्मकोद्वित्वमित्यप्युच्यतां। प्र
त्येकमेकत्वेपिपृथिवीजलयोर्नगंधइतिवदुभयंनैकमित्यस्यसर्वजनसि
द्धत्वात्। यापितदानीमभेदप्रतिपादकआगमःसोपिनार्थस्वत्वादि
नासाम्यंप्रतिपादयति संपदाधिक्यपुरोहितोयंराजासंवृत्तइतिवत्।

अतएव निरंजनः परमं साम्यमुपैतीति श्रूयते। ईश्वरोपि न ज्ञानसुखात्मा
किंतु ज्ञानाद्याश्रयः। नित्यं विज्ञानमानंदं ब्रह्मेत्यादौ विज्ञानपदेन ज्ञाना
श्रय एवोक्तः। यः सर्वज्ञ इत्याद्युत्तराधानंदमित्यस्याप्यानंदवदित्यर्थः।
आनंदोपि दुःखाभावेउपचर्यते भारापगमे सुखी संवृत्तोहमितिवत्
अस्तु वा तस्मिन्नानंदो न तु सावानंदः असुखमिति श्रुतेः। नो विद्यते सुखं
यस्येति कुतो नार्थमिति चेन्न क्लिष्टकल्पनापत्तेः। प्रकरणविरोधात्
आनंदमित्यत्र मत्वर्थीयप्रत्ययाविरोधादिति संक्षेपः। एतेन प्रकृतिः कर्त्री॥ राम
पुरुषः पुष्करपलाशवन्निर्लेपः किंतु चेतनः। कार्यकारणयोरभेदात्का
र्यनाशे सति कार्य[illegible]पलयानाशो न स्यादित्यकारणत्वं तस्य॥

७ निश्वासाभिहतदर्पणस्येव मलिनिमा । कर्त्तव्यमिति व्यापारांशः । तेनां[illegible]यवती
७ बुद्धिः । तत्परिणामेन ज्ञाने पुरुष[illegible]पातालिकः ४७

बुद्धिगतचैतन्याभिमानान्यथानुपपत्त्याच्च कल्पनं । बुद्धिश्च प्रकृतेः परिणामः सत्त्वसे
वमहत्तत्वमंतःकरणमित्युच्यते । तत्सत्वात्सत्वाभ्यां पुरुषस्य संसारापवर्गौ । त
स्याएवइंद्रियप्रणालिकयापरिपरिणतिर्ज्ञानरूपाघटादिनासंबंधः ।
पुरुषकर्तृत्वाभिमानोबुद्धौचैतन्याभिमानश्चभेदाग्रहात् । ममेदंकर्त
व्यमितिमदंशः । पुरुषोपरागोबुद्धेः स्वच्छतयातत्प्रतिबिंबतालिकोद
र्पणस्येवमुखोपरागः । इदमितिविषयोपरागइंद्रियप्रणालिकया
परिणतिभेदस्तात्त्विकश्चसंबंधः । दर्पणमलिनिमेवमुखस्योपलब्धि
खडः रुच्यते । ज्ञानवत्सुखदुःखेच्छाद्वेषप्रयत्नधर्माधर्मा अपिबुद्धेरेवकालिसा
मानाधिकरण्येनप्रतीतेः । तद्भिन्नत्वेमानाभावाच्चमनो अहंकारो

४ नचबुद्धिश्चेतनापरिणामित्वात् । इतिमतमपास्तंकृत्यदृष्टभोगानामिवचैतन्यस्यापि सामानाधि
करण्यप्रतीतेः ४१

भीतिग्रहीतेः। चेत्तुन्यांशे भ्रम इति चेन्न। तत्र्यंशेऽपि किं नेष्यते। अन्यथा बु
द्धेर्नित्यत्वे मोक्षाभावो नित्यत्वे सर्वस्य संसारापत्तिः। अचेतनायाः प्रकृ
तेः कार्यत्वात् बुद्धेरचैतन्य॥ कार्यकारणयोस्तादात्म्यादिति चेन्न। असि
द्धेः। कर्तृजन्यत्वमानाभावात्। वीतरागजन्मादर्शनात् अनादित्वं। अ
नादेर्नाशासंभवान्नित्यत्वात्। तत् किं प्रकृत्यादिकल्पनेन। न च प्रकृतेः क्रि
यमाणानि गुणैः कर्माणि सर्वशः। अहंकारविमूढात्मा कर्ताहमिति मन्यत
इत्यनेन विरोध इति वाच्यं। प्रकृतेरदृष्टस्य गुणैरदृष्टजन्येच्छादिभिः कर्ता
हं कर्ताहमेव सर्वस्य तदर्थत्वात्। तत्रैवं सति कर्तारमात्मानं केवलं तु य इत्या
दिवदता भगवता प्रकटीकृतोयमुपरिष्टाद्वाराय इति संक्षेपः। धर्माधर्मा द्रा
श्रय इति। आत्मेत्यनुषज्यते। शरीरस्य तदाश्रयत्वं देहान्तरकृतकर्मणा

देहांतरेणाभोगानुपपत्तेः अध्यक्षो। विशेषगुणयोग्य इति। योग्यविशेष
गुणसंबंधेन। मनः प्रत्यक्षं भवति न त्वन्यथा। अहं जाने अहं करोमीत्या
दिप्रतीतिः। प्रवृत्तीति। अयमात्मा परदेहे प्रवृत्त्यादिनानुमीयते। प्रवृत्ति
रत्र चेष्टा। ज्ञानेच्छाप्रयत्नादीनां देहे भावस्य तत्प्रायत्नत्वात् चेष्टायाश्च प्रय
त्नसाध्यत्वात्। चेष्टया प्रयत्नवानात्मानुमीयत इति भावः। तत्र दृष्टांतमा
ह। रथेति। यद्यपि रथकर्म चेष्टा न भवति तथापि तेन कर्मणा सारथिर्यथा
नुमीयते तथा चेष्टात्मकेन कर्मणा परात्मापीति भावः। अहंकारस्ये
ति। अहंकरो अहमिति प्रत्ययस्तस्याश्रयो विषय आत्मा न शरीरादिः।
मन इति। मनोभिन्नेंद्रियजन्यप्रत्यक्षाविषयो मानसप्रत्यक्षविषयश्चे

स्पर्शः। रूपाद्यभावेन इंद्रियांतराग्राह्यत्वात्॥ विभुरिति॥ विभुत्वं परममह
त्परिमाणवत्त्वं। तच्च पूर्वमुक्तमपि स्पष्टार्थमुक्तं। बुद्ध्यादीति। बुद्धिसु
खदुःखेच्छाद्यपश्चतुर्दश गुणाः। पूर्वमुक्ता वेदितव्याः। अत्रैव प्रसंगा
द्बुद्धेः कतिपयप्रपंचं दर्शयति। बुद्धिस्तु द्विविधेति। द्वैविध्यं व्युत्पाद
यति। अनुभूतिरिति। प्रत्यक्षमिति। इंद्रियजन्यज्ञानं प्रत्यक्षं। यद्यपि म
नोरूपेंद्रियजन्यं सर्वमेव ज्ञानं तथापि इंद्रियत्वेन रूपेणेंद्रियाणां यत्र
ज्ञाने कारणत्वं तत्प्रत्यक्षमिति विवक्षितं। ईश्वरप्रत्यक्षं तु न लक्ष्यं। इं
द्रियार्थसन्निकर्षोत्पन्नं ज्ञानमव्यपदेश्यमव्यभिचारि व्यवसाया
त्मकं प्रत्यक्षमिति सूत्रे तथैवोक्तत्वात्। अथवा ज्ञानाकारणकं ज्ञानं प्रत्यक्षं॥

यद्यपि परामर्शप्रत्यक्षादिकं परामर्शजन्यं तथापि परामर्शजन्यहेत्वविषयकं ज्ञानमनुमितिः ॥

२श्वरानौ २

अनुमितौ व्याप्तिज्ञानस्य उपमितौ सादृश्यज्ञानस्य शाब्दबोधे पदज्ञानस्य स्मरणे
ति २ अनुभवस्य करणत्वात्तत्रौ व्याप्तिः। इदं लक्षणमीश्वरप्रत्यक्षसाधारणं। परामर्श
जन्यं ज्ञानमनुमितिः। न च कादाचित्कहेत्वविषयकानुमितावव्याप्तिरिति वा
च्यं। तादृशज्ञानवृत्त्यनुभवत्वव्याप्यजातिमत्त्वस्य विवक्षितत्वात् अथवा व्याप्तिज्ञा
नकरणकं ज्ञानमनुमितिः। एवं सादृश्यज्ञानकरणकं ज्ञानमुपमितिः। पदज्ञान
करणकं ज्ञानं शाब्दबोधः। वस्तुतो यात्किंचिदनुमितिव्यक्तिमादाय तद्व्यक्तिवृत्तिप्रत्य
क्षावृत्ति जातिमत्त्वमनुमितित्वं। एवं यत्किंचित्प्रत्यक्षादिव्यक्तिमादाय तद्व्यक्तिवृत्त्यनुमित्य
२ किंश वृत्तिजातिमत्त्वं प्रत्यक्षा[illegible]दिकं वाच्यमिति प्रत्यक्षं न चेश्वरप्रत्यक्षस्याविषजन्य
३ अतै न्यूनत्वं। ४ घ्राणजादीति। घ्राणजं रासनं चाक्षुषं स्पार्शनं श्रौत्रं मानसमिति षड्विधं प्र
त्यक्षं ४ जन्यप्रत्यक्षस्यैव निरूपणीयत्वात्। उक्तसूत्रानुसारात्तु गोचर इति।

ग्राह्य इत्यर्थः। गंधत्वादिरित्यादिपदात्सुरभित्वादिपरिग्रहः। गंधस्य प्रत्यक्षत्वात्तद्वृ
त्तिजातिरपि प्रत्यक्षा। गंधाश्रयग्रहणे तु घ्राणस्य न सामर्थ्यमिति बोध्यं। तथा
रसइति। रसत्वादिसहित इत्यर्थः। तथा शब्दत्वादिसहित इत्यर्थः। गंधोर
सश्चोद्भूतो बोध्यः॥ उद्भूतरूपमिति। ग्रीष्मोष्मादावनुद्भूतरूपमिति न तत्प्रत्य
क्षं। तद्वृत्ति। उद्भूतरूपवंती। योग्येति। पृथक्त्वादिकमपि योग्यव्यक्तिवृत्ति बो
ध्यं। तादृशः योग्यव्यक्तिवृत्तिरित्यर्थः। चक्षुर्योग्यत्वमेव कथं तदाह। गृह्णाती
ति। आलोकसंयोग उद्भूतरूपं च चाक्षुषप्रत्यक्षे कारणं। तत्र द्रव्यचाक्षुषप्रत्य
ति तयोः समवायसंबंधेन कारणत्वं। द्रव्यसमवेतप्रत्यक्षे स्वाश्रयसमवायसं
बंधेन। द्रव्यसमवेतसमवेतस्य रूपत्वादेः प्रत्यक्षे स्वाश्रयसमवेतसमवा

यसंबंधेनेति। उद्भूतेति उद्भूतस्पार्शेन द्रव्यं त्वचो योगो यः। सोऽपि उद्भूतस्पर्शो
पिस्पर्शत्वादिसहितः। रूपान्यादिति। रूपभिन्नरूपत्वादिभिन्नं चक्षुषायो
ग्यं तत्वगिंद्रियस्यापि ग्राह्यं तथा च पृथक्त्वसंख्यादेयाये चक्षुर्ग्राह्यगुणा
उक्ता एवं क्रियाजातयो योग्यावृत्तयश्च त्वचो ग्राह्या इति। अत्रापि त्वगिंद्रि
यजन्यद्रव्यप्रत्यक्षे रूपं कारणं। तथा च बाहिरिंद्रियजन्यद्रव्यप्रत्यक्षे रूपं का
कारणमिति। नवीनास्तु बाहिर्द्रव्यप्रत्यक्षे रूपं कारणं न। प्रमाणाभावात्।
किं तु चाक्षुषप्रत्यक्षे रूपं स्पार्शनप्रत्यक्षे स्पर्शः कारणमन्वयव्यतिरेकात्। बहि
रिंद्रियद्रव्यप्रत्यक्षे किं कारणमिति चेन्न किंचित्। आत्मावृत्तिशब्दभिन्न
विशेषगुणवत्वं वा प्रयोजकत्वमस्तु। रूपस्य कारणत्वे लाघवमिति चेन्न वायो

त्वगिंद्रियेणाग्रहणप्रसंगात्। इष्टापत्तिरिति चेत्। स्पर्शेपनलाघवात्कारणमस्तु
प्रभायाः अप्रत्यक्षत्वमिष्टापत्तिरित्येवाकिं नस्यात्। स्मात्प्रभांपश्यामीतिवद्वायुंस्पृ
शामीतिप्रत्ययसत्वाद्वयोरपि प्रत्यक्षं भवत्येव। बहिर्द्रव्यप्रत्यक्षमात्रे न रूपस्य
नवा स्पर्शस्यापि हेतुत्वं। वायुप्रभयोरेकत्वग्रहस्य तत एव क्वचिद्वित्वादिकमपि
क्वचित्संख्यापरिमाणाद्यग्रहोद्दोषादित्याहुः। त्वङ्मनोयोग इति। त्वङ्मनःसं
योगो ज्ञानसामान्यकारणमित्यर्थः। किं तत्र प्रमाणं। सुषुप्तिकाले त्वचं त्यक्त्वा
पुरीतति वर्तमाने मनसा ज्ञानाजननमिति। ननु सुषुप्तिकाले किं ज्ञानं भवि
ष्यति। अनुभवरूपं वा स्मरणरूपं वा। नाद्यः। अनुभवसामग्र्यभावात्। तथा
हि। प्रत्यक्षे चक्षुरादिनासहमनःसंयोगस्य हेतुत्वात्तदभावादेव नचा

क्षुषादिप्रत्यक्षं। ज्ञानादेरभावादेव न मानसप्रत्यक्षं। ज्ञानाद्यभावे चात्मनोपि न
प्रत्यक्षमिति। व्याप्तिज्ञानाभावादेव नानुमितिः। सादृश्यज्ञानाभावान्नोपमि
तिः। पदज्ञानाभावान्न शाब्दबोधः। इत्यनुभवसामग्र्यभावान्नानुभवः॥ उ
द्बोधकाभावाच्च न स्मरणं। एवं सुषुप्तिप्राक्कालोत्पन्नेच्छादिव्यक्तेस्तत्संबंधेना
त्मनश्चाप्रत्यक्षत्वप्रसंगात्। तदुत्तरोद्भिपत्वे मानाभावात्सुषुप्तिप्राक्कालोत्प
न्नेच्छादिनिर्विकल्पकमेव नियमेन जायत इत्यत्रापि प्रमाणाभावात्। अथवा
ज्ञानमात्रे त्वङ्मनःसंयोगस्य यदि कारणत्वं तदा रासनचाक्षुषादिप्रत्य
क्षकाले त्वाचप्रत्यक्षं स्यात्। विषयत्वक्संयोगस्य त्वङ्मनःसंयोगस्य च
सत्वात्। परस्परप्रतिबंधादेकमपि वा न स्यात् इति। अत्र केचित्पूर्वोक्तयु

त्वात्वङ्मनःसंयोगस्यहेतुत्वसिद्धेश्चाक्षुषादिसामग्र्यास्पार्शनादिप्रतिबंध
कत्वमनुभवानुरोधेनकल्प्यतइति।अन्येतुसुषुप्त्यनुरोधात्त्वङ्मनःसंयोग
स्यज्ञानहेतुत्वंकल्प्यं।चाक्षुषादिप्रत्यक्षकालेचत्वङ्मनःसंयोगाभावान्नत्वा
चप्रत्यक्षमिति।मनोग्राह्यमिति।मनोजन्यप्रत्यक्षविषयइत्यर्थः।मतिर्ज्ञा
नंकृतिर्यत्नश्चवस्तुसुखत्वादिकमपिमनोग्राह्यं।एवमात्मापिमनोग्राह्यः।।
किंतुमनोमात्रस्यगोचरइत्यनेनपूर्वमुक्तत्वादत्रनोक्तः।निर्विकल्पाख्यमि
ति।चक्षुःसंयोगाद्यनंतरंघटइत्याकारकंघटत्वादिविशिष्टज्ञानंनसंभ
वति।पूर्वंविशेषणस्यघटत्वादेर्ज्ञानाभावात्।विशिष्टबुद्धौविशेषणज्ञा
नस्यकारणत्वात्तथाचप्रथमतोघटघटत्वयोर्वैशिष्ट्यानवगाह्येवज्ञा

नेज्ञायेते तदेव निर्विकल्पकं तच्च न प्रत्यक्षं। तथाहि। वैशिष्ट्यानवगाहि ज्ञानं
स्य प्रत्यक्षत्वं न संभवति। घटमहं जानामीति प्रत्ययात्। तत्रात्मनि ज्ञानं प्रका
रीभूय भासते। ज्ञाने घटः तत्र घटत्वं प्रकारो यः स एव विशेषणमित्युच्यते।
विशेषणे यद्विशेषणं तद्विशेषणतावच्छेदकं तत्तत्प्रकारकं ज्ञानं विशिष्टवै
शिष्ट्य ज्ञाने कारणं। निर्विकल्पके च घटत्वादिकं न प्रकारस्तेन घटत्वादिवि
शिष्टघटादिवैशिष्ट्यभानं ज्ञाने न संभवति। घटत्वाद्यप्रकारकं च घटादिवि
शिष्टज्ञानं न संभवति। जात्यतिरिक्तपदार्थस्य किंचिद्धर्मप्रकारकत्वनियमा
त्। महत्त्वं षड्विधं इति। द्रव्यप्रत्यक्षे महत्त्वं समवायसंबंधेन कारणं द्रव्यसमवेतानां प्र
त्यक्षे स्वाश्रयसमवायसंबंधेन तत्समवेतप्रत्यक्षे स्वाश्रयसमवेतसमवायसंबं

धनकारणमिति। इंद्रियमिति। अत्रापिषड्विधत्वमनुषज्यते। इंद्रियत्वंतु
नजातिः। पृथ्वीत्वादिनासांकर्यात्। किंतुशब्देतरोद्भूतविशेषगु
णानाश्रयत्वेसतिज्ञानकारणमनःसंयोगाश्रयत्वं। आत्मादिवारणा
यसत्यंतं। उद्भूतविशेषगुणस्यश्रोत्रेसत्वाच्छब्देतरेति। विशेषगुणस्य
रूपादेश्चक्षुषिसत्वादुद्भूतेति। उद्भूतत्वंनजातिः। शुक्लत्वादिनासां
कर्यात्। नचरूपत्वादिव्याप्यनानैवोद्भूतत्वमितिवाच्यं। उद्भूतरू
पत्वादिनाचाक्षुषादौजनकत्वानुपपत्तेः। किंतुरूपत्वादिव्याप्यमनु
द्भूतत्वंनानातदभावकूटश्चोद्भूतत्वं। तच्चसंयोगादावपितथायत्र

द्वेसरोद्भूतद्गुणःसंयोगादिश्चक्षुरादावस्यलोविशेषेति। कालादिवारणायवि
शेष्यपदं इंद्रियावयवविषयसंयोगस्यापि प्राचां मते प्रत्यक्षजनकत्वा
त। इंद्रियावयवावणाय कालादौ रूपाभाव प्रत्यक्षे सान्निकर्षघटक त
या कारणभूत चक्षुःसंयोगाश्रयस्य कालादेर्वारणाय मनःप
मनःपदं। ज्ञानकारणमित्यपि तद्वारणाय।। करणमिति।
असाधारणकारणंकरणं असाधारणत्वं व्यापारः सन्नि
कर्षः। षड्विधसन्निकर्षमुदाहरणद्वारा दर्शयति। द्रव्यमहइति।। द्रव्य
व्यप्रत्यक्षमिंद्रियसंयोगजन्यं। द्रव्यसमवेतप्रत्यक्षमिंद्रियसंयुक्तसमवा

यजन्यमेवमयोपि ।। वस्तुतस्तु द्रव्यचाक्षुषंप्रति चक्षुःसंयोगः प्रका
रणं ।। द्रव्यसमवेत चाक्षुषंप्रति चक्षुःसंयुक्तसमवायः ।। द्रव्यसमवेत
चाक्षुषंप्रति चक्षुःसंयुक्तसमवेतसमवायः ।। एवमन्यत्रापि विशि
ष्टैव कार्यकारणभावः ।। परंतु पृथिवीपरमाणुनीलेनीलेहंपृ
थिवीपरमाणोः पृथिवीत्वं चाक्षुषं कथं न गृह्यते तत्र परंपरया
उद्भूतरूपसंबंधस्य महत्वसंबंधस्य चाविद्यमानत्वात् ।। तथा
हि ।। नीलत्वं जातिरेकैव घटनीले परमाणुनीले च वर्तते ।।

त्वादिग्रहः॥ परमाणुचक्षुःसंयोगस्य महत्वावछिन्नत्वा
भावात्॥ एवं वायुवादौ नसत्वादि चाक्षुषं तत्र चक्षुः
संयोगस्य रूपावछिन्नत्वात्॥ एवं यत्र घटस्य दृष्टा
वछेदेनाआलोकासंयोग चक्षुषाविशेषणं बोध्यं॥ ए
वं द्रव्यमस्पार्शनप्रत्यक्षेत्वकुसंगः कारणं॥ द्रव्यसम
वेतस्पार्शनप्रत्यक्षेत्वकुसंयुक्तसमवायः॥ द्रव्य

समवेतसमवेतस्पार्शनप्रत्यक्षेत्वकुसंयुक्तसम
वेतसमवायः॥ अत्रापि महत्वावछिन्नत्वमुद्भूतस्पा
र्शावछिन्नत्वं च पूर्ववदेव बोध्यं॥ एवं गंधप्रत्यक्षे
घ्राणयुक्तसमवायः॥ रसप्रत्यक्षे रसनसंयुक्तसम
वायः॥ गंधसमवेतप्रत्यक्षस्य घ्राणजन्यप्रत्यक्षे घ्राण
संयुक्तसमवेतसमवायः॥ रससमवेतस्य रासनप्रत्य
क्षे रसनयुसंक्तसमवेतसमवायः॥ कारणं॥ शाब्दप्रत्य

क्षेश्रोत्रावच्छिन्नसमवायः॥शब्दसमवेतप्रत्यक्षेश्राव
णप्रत्यक्षेश्रोत्रावच्छिन्नसमवेतसमवायः॥अत्रसर्वत्र
प्रत्यक्षेलौकिकंबोध्यं॥वक्ष्यमाणमलौकिकप्रत्यक्ष
मिंद्रियसंयोगादिकंविनापिभवति॥एवमात्मप्रत्य
क्षेमनःसंयोगआत्मसमवेतमानसप्रत्यक्षेमनःसंयु
क्तसमवायः॥आत्मसमवेतसमवेतमानसप्रत्यक्षेम ३७
नःसंयुक्तसमवेतसमवायःकारणं॥अभावप्रत्यक्ष-

तथाचमहत्वसंबंधोघटनीलमादायवर्ततेरूपसंबंधस्तु
उभयमादायैववर्तते॥एवंपृथिवीत्वेपिघटादिकमादायम
हत्वसंबंधोबोध्यः॥एवंवायोस्तदीयस्यस्पर्शादेश्चसत्ता
याश्चाक्षुषप्रत्यक्षंस्यात्॥तस्मादुद्भूतरूपावच्छिन्नचक्षुः
चैसंयुक्तसमवायस्यद्रव्यसमवेतप्रत्यक्षेहेतुत्वाच
क्षुःसंयुक्तसमवेतसमवायस्यद्रव्यसमवेतसमवेतप्र
त्यक्षेकारणत्वंवाच्यं॥इत्थंचपरमाणुनीलादौननील

समवायप्रत्यक्षेन्द्रियसंबद्धविशेषणताहेतुः॥ वैशे
षिकमतेतुसमवायोनप्रत्यक्षः॥ यदिस्यादित्यादि
अभावप्रत्यक्षेयोग्यानुपलब्धिकारणं॥ तथाहि॥
भूतलादौघटादिज्ञानेघटाभावादिकंनज्ञायेत॥
तेनाभावोपलंभप्रतियोग्युपलंभाभावःकारणं।
तत्रयोग्यताप्यपेक्षितासाचप्रतियोगिक्याप्रसं

त्वप्रसंजनप्रसंजितप्रतियोगिकत्वरूपा ॥ तदर्थ
श्च प्रतियोगिनो घटादेः सत्त्वप्रसक्त्या प्रसंजित
उपलंभरूपः प्रतियोगी यस्य सः उपलंभाभावो भा
वप्रत्यक्षे हेतुः ॥ तथा हि ॥ यत्रासंअलोकासंयो
गादि वर्त्तते ॥ तत्र यद्यत्र घटः स्यात्तर्हि उपलभ्येत
त्यापादयितुं शक्यते तत्र घटाभावादि प्रत्यक्षं भवति ३५

त्र धूमत्वेन संनिकर्षेण धूम इत्येवं रूपं सकल धूमवि
षयकं ज्ञानं न स्यात्तत्र धूमत्वे ज्ञायते ॥ अत्र यदीं
द्रियसंबंधमित्येवोच्यते तदा धूलीपटलेन धूम
प्रमानंतरं सकल धूमविषयकं ज्ञानं न स्यात्तत्र
धूमत्वेन सहेंद्रियसंबंधाभावात् ॥ मन्मते इंद्रिय
संबंधं धूलीपटलं तद्विशेष्यकं धूमः ॥ इति ज्ञानं
तत्रप्रकारीभूतं भूधूमत्वं प्रत्यासत्तिः ॥ इंद्रियसं ३८

अंधकारस्तु नापादयितुं शक्यते न ते घटाभावादेरंधका
रेन चाक्षुषप्रत्यक्षं स्पार्शनप्रत्यक्षं तु भवत्येव आलो
कसंबंधं विनापि स्पार्शनप्रत्यक्षस्यापादयितुं शक्य
त्वात् ॥ गुरुत्वादिकं यावद्योग्यं तदभावस्तु न प्रत्य
क्षः ॥ गुरुत्वादिप्रत्यक्षस्यापादयितुमशक्यत्वात् ॥
वायौ उद्भूतरूपाभावः ॥ पाषाणे सौरभाभावो गुडे ति
क्ताभावः वह्नौ अनुष्णाभावः श्रोत्रे शब्दाभावः ।

आत्मनि सुखाभावप्रत्यक्षादौ यस्तादिंद्रियग्रह्यत्वं ते॥ मूल
प्रक्षस्यापादयितुं त्राकृयतत्त्वात्तुसंसर्गाभावप्रत्यक्षे
प्रतियोगियोग्यता अन्योन्याभावप्रत्यक्षे अ
धिकरणयोग्यत्वमपेक्षितं॥ अतस्तंभादौ पिशाचा
दिभेदो भ्रचक्षुषा गृह्यत एव॥ प्रत्यक्षं लौकिकालौ
लौकिकभेदेन द्विविधं॥ तत्र लौकिकप्रत्यक्षे षोढा
संनिकर्षा उक्ताः॥ अलौकिकसंनिकर्षानिदानीं

वक्ति॥ अलौकिक इति॥ व्यापारसंनिकर्षः सामान्य
लक्षण इति॥ सामान्यं लक्षणं यस्येत्यर्थः॥ तत्र लक्षल
णपदेन यदि स्वरूपमुच्यते तदा सामान्यस्वरूपं
प्रत्यासत्तिरित्यर्थो लभ्यते॥ तच्चेंद्रियसंबंधवि
शेष्यकज्ञाने प्रकारीभूतो बोध्यं॥ तथाहि॥ य
त्रेंद्रियसंबंयुक्तो धूमादिस्तद्विशेष्यकं॥ धूम
इति ज्ञानं यत्र जातं तत्र ज्ञाने धूमत्वं प्रकारः॥ त

इंद्रियसंबंधस्यस्वलौकिकोग्राह्यः। इदंचबाह्येंद्रियस्थलेमा
मानसस्थलेतुज्ञानप्रकारीभूतसामान्यंसंनिकर्षः। परंतुस
मानानांभावः सामान्यं॥ तच्चक्वचिंनित्यधूमत्वादि। क्वचि
च्चानित्यंघटादि यत्रैकोघटः संयोगसंबंधेनभूतलेसमवा
यसंबंधेनकपालेवाज्ञातः तदनंतरंसर्वेषांघटवतांभूतला
दीनांकपालानांवाज्ञानंभवति। तत्रेदंबोध्यं। परंतुसा
मान्यंयेनसंबंधेनज्ञायतेतेनसंबंधेनाधिकरणानांप्र

त्यासत्तिः॥ किंतु यत्र घटनाशानंतरं तद्घटवतःस्मरणं जातं
छ तत्र सर्वेषां घटवत्तां भानं न स्यात्॥ सामान्यस्य तदानीमभावा
त्। किंचेंद्रियसंबंधाविशेष्यकं घट इति ज्ञानं यत्र जातं तत्र प
ह रदिने इंद्रियसंबंधं विनापि तादृशप्रकारीभूतसामान्यस
त्वात्सकलविषयकं ज्ञानं कुतो न जायते॥ तस्मात्सामा
न्यज्ञानं प्रत्यासत्तिर्न तु सामान्यमित्याह आसत्तिरिति प्र
त्यासत्तिरित्यर्थः॥ सामान्यज्ञानमिति॥ तथा च सामान्य
लक्षणा इत्यत्र लक्षणाशब्दस्य विषयोर्थः॥ तेन सामान्यं ३९

विषयकं ज्ञानं प्रत्यासत्तिरिति लभ्यते ।। ननु चक्षुःसंयोगादि
कं विनापि सामान्यज्ञानं यत्र वर्त्तते तत्र सकलघटादीनां प्र
त्यक्षं स्यादत आह ।। तदिंद्रियजेति अस्यार्थः ।। यदा बहिरिं
द्रियेण सामान्यलक्षणया ज्ञानं जननीयं तदा यत्किंचिद्ध
र्मेणि न सामान्यस्य तदिंद्रियजन्यज्ञानस्य सामग्र्यपे
क्षिता ।। सा च सामग्री चक्षुःसंयोगादिकं तेनांधकारा
दौ चक्षुरादिना तादृशज्ञानं न जायते ।। ननु ज्ञानलक्ष
णाप्रत्यासत्तिर्ज्ञानरूपा यदि सामान्यलक्षणापि ज्ञान

रूपा तदा तयो र्भेदो न स्याच्च दाहविषयीत्ति ॥ सामान्य
ज्ञानपाप्रत्यासत्यातिर्हि तदाश्रयस्य ज्ञानं जनयति
ज्ञानलक्षणाप्रत्यासत्तिरत्र यद्विषयकं ज्ञानं तस्यैव
प्रत्यासत्तिरितिरिति अत्रायमर्थः प्रत्यक्षसंनिकर्षविना
भानं न संभवंति धूमत्वेन सकलधूमानां वन्हित्वेन स
कलवन्हीनांच्च भानं कथं भवति तदर्थं सामान्यल
क्षणयास्वीक्रियते नेन च सकलवाह्नि धूमाभावे काक्ष ३०

त्तिरितिवाच्यं प्रत्यक्षधूमोवह्निसंबंधस्य धर्मगृहीतत्वाद
न्यधूमस्यचानुपस्थितेस्त्वाद्धूमोवह्निव्याप्योनवे
तिसंशयानुपपत्तेः॥ मन्मते तु सामान्यलक्षणयासक
लधूमोवह्निस्थितौ कालांतरीयदेशांतरीयधूमो
वह्निव्याप्यत्वसंदेहः संभवति न च सामान्यलक्षणस्वरू
पिणास्वाकारप्रमेयत्वेन सकलप्रमेयज्ञाने ज्ञातेसा

सार्वज्ञापत्तिरिति वाच्यं ।। प्रमेयत्वेन कुसल ज्ञाने जाते विशे
ष्यसकलपदार्थानाम ज्ञानेनेव न सार्वज्ञानाभावात् एवं ज्ञा
नलक्षणा अस्वीकारे सुरभिचंदनमिति ज्ञाने सौरभस्य भा
नं कथं स्यात् यद्यपि सामान्यलक्षणया सौरभस्य ज्ञानं न संभ
वति तथापि सौरभत्वस्य ज्ञानं ज्ञानलक्षणया ।। एवं धूमत्वे
न धूलीपटलं यत्र ज्ञानं तत्र धूलीपटस्यानुव्यवसाय
मानं ज्ञानलक्षणयायोभिन्नोहि विधा ।। एकामुंज्ञा ६०

धूमलेखांपश्यतितदनंतरंधूमोवह्निव्याप्यइत्येवंरूपंव्या
प्तिस्मरणंतस्यभवति॥ पश्चाच्चवह्निव्याप्यधूमवानयंपर्व
तइतिज्ञानंभवति॥ सएवपरामर्शःइत्युच्यतेतदनंतरंप
र्वतोयंवह्निमानितिज्ञानंजायतेतदेवअनुमितिः॥ प्राची
नाःवदतिव्याप्यत्वेनज्ञायमानंधूमादिलिंगमनुमितिक
रणमितितद्दूषयतिज्ञायमानमिति॥ लिंगस्यअनुमि
तिकरणत्वेयुक्तिमाह अनागतादीति॥ यद्यनुमितौलिं

गंज्ञांकरणंस्यात्तदाअनागतेनविनष्टेनवालिंगेनानुमि
तिर्नस्यात् अनुमितिकरणस्यलिंगस्यतदानीमभावादि
ति॥ व्याप्यस्येति॥ व्याप्तिविशिष्टस्यपक्षेणसहष्या
वगाहिज्ञानंअनुमितेर्जनकं॥ तच्चव्याप्यःपक्षेइतिज्ञा
नंपक्षोव्याप्यवानितिज्ञानंवाअनुमितिस्तुपक्षेव्याप्यइति
ज्ञानात्पक्षेसाध्यमित्याकारिकापक्षोव्याप्यवानितिज्ञा
नात्पक्षःसाध्यवानितिद्विविधादपिपरामर्शात्पक्षःसाध्य

वान्नित्येवानुमितिरित्यन्ये ॥ ननु वह्निव्याप्यधूमवानयं पर्वत
इति ज्ञानं विनापि यत्र पर्वतो धूमवानिति प्रत्यक्षं ततो धू
मो वह्निव्याप्य इति स्मरणं तत्र ज्ञानद्वयादेव अनुमितिदर्श
नात् व्याप्तिविशिष्टवैशिष्ट्यावगाहि ज्ञानं सर्वत्र न कारणं
किंतु व्याप्यतावच्छेदकप्रकारपक्षधर्मताज्ञानत्वेन कारणत्वं
॥ अवश्यकत्वात् ॥ विशिष्टज्ञानकल्पने गौरवाच्चेति चेत् ॥ न
व्याप्यतावच्छेदकज्ञानेपि वह्निव्याप्यवानयमिति ज्ञानादनु ६२
मित्युत्पत्तेः ॥ लाघवाच्च व्याप्तिप्रकारकपक्षधर्मताज्ञानत्वेन हे न

नाम्न अतो योगजधर्मस्यापि हेतो विध्यं ॥ युक्तस्य तावद्योगज
धर्मसहायेन मनसा आकाशपरमाण्वादिनिखिलपदार्थगो
चरं ज्ञानं सर्वदैव भवति तु महासिद्धितो यस्याचिंताविशेषोपि
सहकारीति ॥ अनुमितिं व्युत्पादयति ॥ व्यापारस्त्विति ॥ अ
नुमायामनुमितौ ॥ व्याप्तिकरणं ॥ परामर्शो व्यापारः ॥ त
था हि ॥ येन पुरुषेण महानसादौ धूमवह्न्योर्व्याप्तिर्गृही
ता पश्चात् स एव पुरुषः कचित्पर्वतादौ अविच्छिन्नमूलां

त्तुत्वं किंच धूमवानिति ज्ञानादनुमित्यापत्तिः॥ व्याप्यतावच्छेद
कीभूतधूमत्वप्रकारकज्ञानस्य सत्त्वात्॥ न च गृह्यमाणव्या
प्ताव्यच्छेदकप्रकारकपक्षधर्मताज्ञानस्य हेतुत्वं वाच्यं॥ चैत्र
स्य व्याप्तिग्रहे मैत्रस्य पक्षधर्मताज्ञानादनुमित्यापत्तेः॥ य
दि तत्पुरुषीयगृह्यमाणव्याप्यतावच्छेदकप्रकारकं तत्पुरुषी
यपक्षधर्मताज्ञानं तत्पुरुषीयानुमितौ हेतुरित्युच्यते तदानं
तकार्यकारणभावः॥ मन्मते तु समवायेन व्याप्तिप्रकारकं

पक्षधर्मताज्ञानंस्मवायेनानुमितिं जनयतीति नानंतकार्य
कारणभावः।। यदितु व्याप्तिप्रकारकंज्ञानं पक्षधर्मताज्ञानंच
स्वतंत्रं कारणमित्युच्यते।। तदा कार्यकारणभावद्वयं।। वह्नि
व्याप्यो धूमआलोकवान्पर्वत इति ज्ञानाप्यनुमितिःस्या
दिति।। इत्थं च यत्र ज्ञानद्वयं तत्रापि विशिष्टज्ञानं कल्पनी
यं फलमुखगौरवस्यादोषयित्वादिति।। व्याप्यो नाम व्याप्त्याश्र
यः।। तत्र व्याप्तिः केत्यत आह ------ ह्रदादि।। साध्येति छे३
चवह्निमान्धूमादित्यादौ साध्यं वह्निः साध्यवान्महानसादि तदन्यो
ह्रदादिः

त्वेपिनाक्षतिः।।साध्यवदन्यावृत्तित्वंचसाध्यवदन्यवृत्तित्वत्वाव
छिन्नाभावः तेनधूमवान्वह्नेरित्यत्रसाध्यवदन्यह्रदादिवृत्तित्वा
भावेपिनातिव्याप्तिः।। अत्रयद्यपिद्रव्यंगुणकर्मान्यत्वविशिष्टस
त्वादित्यादौविशिष्टसत्तायाःसत्तायाश्च एक्यात्साध्यवदन्यस्मि
न्गुणादाववृत्तित्वंनास्ति।। तथापिहेतुतावछेदकरूपेणावृत्ति
त्वंवाच्यं।। हेतुतावछेदकंवृत्त्यवछेदकमितिफलितार्थः ननुके
कलान्वयित्वादौसाध्यवदन्यस्याप्रसिध्यताद्व्याप्तिः किंच
सत्तावान्जातेरित्यादौसाध्यवदन्यस्मिन्सामान्यादौहेतुता

वछेदकसंबंधेनसमवायेनवृत्तेरप्रसिध्यत्वादव्याप्तिरतआहअ
थवेति।। हेतुवंनिष्ठा यस्यसतथा।। विरहो अभावः।। तथाच
स्तर हेत्वधिकरणवृत्तिर्योअभावंप्रतियोगिनासाध्येनसहहेतोः
सामानाधिकरण्यंव्याप्तिः।। अत्रयद्यपिवह्निमान्धूमादित्या
दौहेत्वधिकरणपर्वतादिवृत्त्यभावप्रतियोगित्वंतत्तद्वह्न्यभावादे
रस्तीत्यव्याप्तिः।। नचसमानाधिकरणवन्हिधूमयोरव्या
प्तिरितिवाच्यं।। तत्रवह्नेरप्युभयाभावादिसत्वात्।। एकसत्वेपि
द्वयंनास्तीतिप्रतीतेर्गुणवान्द्रव्यत्वादित्यादावव्याप्तेश्च

तथापि ।।साध्यतावछेदकं प्रतियोगितावछेदकभिन्नमिति वाच्यं। ननु रूपत्वव्या
प्यजातिमान् पृथिवीत्वादित्यत्र साध्यतावछेदिका रूपत्वव्या
प्या जातयस्तासां च शुक्लत्वादिरूपाणां नीलघटादौ वृत्त्यभा
वप्रतियोगितावछेदकत्वमस्तीत्यव्याप्तिरिति चेत्।। न तत्र
परंपरया रूपत्वव्याप्यजातित्वस्यैव साध्यतावछेदकत्वात्
।।नहि तादृशधर्मावछिन्नाभावः क्वापि पृथि~~व्यां~~व्यां नास्ति रू
पव्याप्यजातिमन्नास्तीति बुध्यापत्तेः।। साध्यादिभेदेन व्या
प्तेर्भेदात्तादृशस्थले साध्यतावछेदकतावछेदकं प्रतियोगि धे९

तद्वृत्तित्वं धूमस्येति लक्षणसमन्वयः।। धूमवान्वन्हेरित्यादौ साध्यवद
न्यास्मिन्नयःपिंडादौ वन्हेः सत्वान्नातिव्याप्तिः।। अत्र येन संबंधेन सा
ध्यं तेनैव साध्यवान्बोध्यः।। अन्यथा समवायसंबंधेन वह्निमान् वन्ह्य
वयवस्तदन्यो महानसादिस्तत्र धूमस्य विद्यमानत्वादव्याप्ति
प्रसंगात्।। साध्यवदन्यस्य साध्यवत्वावछिन्नप्रतियोगिताकभे
दवान्बोधः।। तेन यत्किंचिद्वह्निमत्तो महानसादिभिन्ने पर्वतादौ
धूमस्य सत्वेपि न क्षतिः।। येन संबंधेन हेतुता तेनैव साध्यवदन्यावृत्तित्वं
बोध्यं।। तेन वह्निवदन्यास्मिन्धूमावयवे धूमस्य समवायसंबंधेन स

तावच्छेदकतानवच्छेदकमित्येवलक्षणघटकमित्यपि——————हे
त्वधिकरणंच हेतुतावच्छेदकविशिष्टाधिकरणं वाच्यं ।। तेन द्रव्यं
गुणकर्मान्यत्वविशिष्टसत्वादित्यादौ शुद्धसत्ताकरणगुणानिष्ठा
करभावप्रतियोगित्वेपि द्रव्यस्य न व्याप्तिः ।। हेतुतावच्छे
दकसंबंधेन हेत्वधिकरणं बोध्यं ।। तेन समवायेन धूमाधि
करणतदवयवनिष्ठाभावप्रतियोगित्वेपि वन्हेर्नाव्याप्तिः
अभावश्च प्रतियोगिव्यधिकरणो बोध्यः तेन कपिसंयो

गी एतद्वृक्षत्वादित्यत्र मूलावछेदेनैतद्वृक्षवृत्ति कपिसंयोगाभा
वप्रतियोगित्वेपि कपियोसंयोगस्य नाव्याप्तिः।। नच प्रतियो
गिव्याधिकरणत्वं यादृशप्रतियोग्यनधिकरणवृत्तित्वं तथैवाव्या
प्तिः।। प्रतियोगिनः कपिसंयोगस्यानधिकरणे गुणादौ वर्त
तेयो अभावस्यैतद्वृक्षे मूलावछेदेन सत्वात्।। यादृशप्रतियोग्य
धिकरणावृत्तित्वं तादृशसंयोगी सत्वादित्यादावव्याप्तिः।। ७६
सत्ताधिकरणे गुणादौ यः संयोगाभावस्तस्य प्रतियोग्य

ज्ञानवान्सत्वादित्यादौसत्वाधिकरणेघटादेविषयतायाज्ञानाधिकरणत्वेपिन
क्षतिः इत्थंच वह्निमान्धूमादित्यादौधूमाधिकरणेसमवायेनवह्निविरहस
त्वेपिनक्षतिः।।ननुप्रतियोगितावछेदकावछिन्नस्यकस्यचिदनाधिकर
णत्वं।।तत्सामान्यस्यवायत्किंचित्प्रतियोगितावछेदकावछिन्नान
धिकरणत्वंवाविवक्षितं।।आद्येकपिसंयोगीएतद्वृक्षात्वादित्यत्राव्या
प्तिः।।कपिसंयोगस्यभावस्यहिप्रतियोगितावछेदकावछिन्नोवृक्षा
वृत्तिरपिकपिसंयोगोभवतितदनाधिकरणंवृक्षइति।।द्वितीयंतु।
प्रतियोगिव्यधिकरणाभावप्रसिद्धिः।।सर्वस्यैवाभावस्यपूर्वस

णवृत्तित्वविशिष्टस्याभावात्मकप्रतियोगिसमानाधिकरण
त्वात्।।नचवह्निमान्माधूमादित्यादौघटाभावादेःस्वाभावा
त्मकप्रतियोग्यधिकरणत्वेयद्यपिपर्वतादेस्तथापिसाध्य
तावछेदकसंबंधेनतत्प्रतियोग्यनाधिकरणत्वमस्त्येवेति
कथंप्रतियोगिव्यधिकरणाप्रसिद्धिरितिवाच्यं।।घटाभा
वेयोवह्न्यभावस्तत्स्वस्यघटाभावात्मकतयाघटाभावस्यव
ह्निरपिप्रतियोगी।।तदधिकरणंचपर्वतादिरितिक्रमे

णप्रतियोगिव्यधिकरणस्याप्रसिद्धत्वात्॥ यदि तु घटाभावा
दावव्याप्यभावादिर्भिन्न इत्युच्यते॥ तथापि धूमाभाववान्व
ह्नेरभावादित्यादावव्याप्तिः॥ तत्र साध्यतावच्छेदकसंबंधे
स्वरूपसंबंधस्तेन संबंधेन च सर्वस्यैवाभावस्य पूर्वेण क्षणवृ
त्तित्वस्यावशिष्टस्याभावाधिकरणत्वं हेत्वधिकरणस्येति॥
द्वितीये तु कपिसंयोगाभाववानात्मत्वादित्यादौ अव्याप्तिः
तत्रात्मवृत्तिकपिसंयोगाभावाभावः कपिसंयोगस्य ९९

धिकरणद्रव्यवृत्तित्वादिति चेत्॥ हेत्वधिकरणे प्रतियोग्यन
धिकरणवृत्तित्वावशिष्टस्याविवक्षितत्वात्॥ प्रतियोग्यनधिक
रणं हेत्वधिकरणमिति निष्कर्षः॥ प्रतियोग्यनधिकरणं च प्रति
योगितावच्छेदकावच्छिन्नानधिकरणं बोध्यं॥ तेन विशिष्टस
त्तावान् जातेरित्यादौ न॥ व्यधिकरणगुणादेर्विशिष्टसत्ता
भावप्रतियोगिसत्ताधिकरणत्वेपि न क्षतिः॥ अत्र च साध्य
तावच्छेदकसंबंधेन प्रतियोग्यनधिकरणत्वं वाच्यं॥ तेन

प्रतियोगितावच्छेदकं गुणसामान्याभावत्वमापत्तेरवच्छिन्ना
नधिकरणत्वं हेत्वधिकरणस्यासनइति ॥ मेवं ॥ यादृशप्रति
योगितावच्छेदकावच्छिन्नानाधिकरत्वं हेतुमतस्तादृशंप्रति
योगितानाश्रयत्वस्याविवक्षितत्वात् ॥ कालोघटवान्काल
परिमाणादित्यत्र प्रयोगिव्याधिकरणाभावाप्रसिद्धिः ॥ हेत्व
धिकरणस्य माहाकालस्य जगदाधारतयासर्वेषांमेवाभा
वानांसध्यतावच्छेदकसंबंधेनाविशेषत्तयाप्रतियोग्यधि

करणत्वसत्वात्॥ अत्र केचित्॥ महाकालान्यत्वविशिष्ट
घटाभावस्तत्र प्रतियोगिव्यधिकरणः॥ महाकालस्य
घटाधारत्वेपि महाकालान्यत्वविशिष्टघटा—धारत्वात्
॥ महाकालमहाकालभेदाभावात् वस्तुतस्तु प्रतियो
गितासंबंधेन प्रतियोग्यनधिकरणीभूतहेत्वधिकरण
वृत्त्यभावप्रतियोगितासामान्ये यत्संबंधावच्छिन्नत्वय ७९
त्धर्मावच्छिन्नत्वोभयाभावस्तेन संबंधेन तत्धर्मावच्छिन्न

वोभयाभयावसत्वान्नाव्याप्तिः ॥ ननु प्रमेयवाह्निमान्धूमादि
अ त्यादौ प्रमेयवाह्नित्वावच्छिन्नत्वं प्रसिद्धं ॥ गुरुधर्मस्यानव
च्छेदकत्वात् इति चेत् ॥ न कंबुग्रीवादिमान्नास्तीति प्रती
त्या कंबुग्रीवादिमत्वावच्छिन्नप्रतियोगिताविषयीकरणे
न गुरुधर्मस्याप्यवच्छेदकत्वस्वीकारादिति संक्षेपः ॥ प
क्षतेतिलमित्यत्र पक्षत्वं किं तदाह सिसाधयिषेति ॥ सि
साधयिषाविरहविशिष्टायाः सिद्धेरभावः पक्षता ॥ तद

वान् पक्ष इत्यर्थः ॥ सिषाधयिषामात्रं न पक्षता ॥ विनापि सिषाधयिषां
घनगर्जितेन मेघानुमानात् ॥ अत एव साध्यसंदेहोपि न पक्षता
॥ विनापि संदेहं घनगर्जितेन मेघानुमानात् ॥ सिद्धौ सत्याम
पि सिषाधयिषासत्वेनुमितिर्भवत्येवातः ॥ सिषाधयिषावि
रहविशिष्टत्वं सिद्धेर्विशेषणं ॥ तथा च यत्रधिर्नास्ति तत्र सिषा
धयिषायां सत्यामसत्यां वा च पक्षता ॥ यत्र सिषाधयिषास्ति
तत्र सिद्धौ सत्यामसत्यां च पक्षता ॥ यत्र सिद्धिरास्ति सिषाध

यिषाचनास्तितत्रनपक्षता॥सिषाधयिषाविरहविशिष्टसिद्धेः सत्वा
त्॥ननुयत्रपरामर्शानंतरंसिद्धिस्ततःसिषाधयिषा॥तत्रासिषा
धयिषाकालेपरामर्शनाशान्नानुमितिः यत्रसिषाधयिषासिद्धि
परामर्शास्तत्रपरामर्शकालेसिषाधयिषैवनास्ति॥एवमन्यत्रा
पिसिद्धिकालेपरामर्शकालेवानसिषाधयिषा॥योग्यविभुवि
शेषगुणानांयौगपद्यनिषेधात्॥तत्कुतः सिषाधयिषावि
रहविशिष्टत्वंसिद्धेर्विशेषणमितिचेत्॥नयत्रवन्हिव्याप्य ५१
धूमवान्पर्वतोवन्हिमानितिप्रत्यक्षंस्मरणंवाततःसिषाध

स्यतद्धेतुव्यापकत्वंबोध्यं॥व्यापकसामानाधिकरण्यंव्या
प्तिः॥साध्यतावच्छेदकसंबंधेनसा॥व्याधिकरणहेतुतावच्छे
दकसंबंधेनहेतोर्वृत्तित्वंइत्थंचकालोघटवान्कालपरि
माणादित्यादौसंयोगसंबंधेनघटाभावप्रतियोगिनोघ
टस्यानधिकरणेमहाकालेवर्त्तमानःस एवसंयोगेनघ
टाभावस्तस्यप्रतियोगितायांकालिकसंबंधावछिन्न

षिषातत्र पक्षतासंपत्तये तद्विशेषणावश्यकत्वादिति ।। अत्रेदंबोध्यं ।।
यादृशायादृशासिषाधयिषासत्वे सिद्धिसत्वे यल्लिंगकानुमितिस्ता
दृशातादृशासिषाधयिषाविरहविशिष्टसिध्यभाववत्तल्लिंगका
नुमितौ पक्षता ।। तेन सिद्धिपरामर्शसत्वे यत्किंचित्तज्ज्ञानंजायत
मितीच्छायामपिनानुमितिः ।। वह्निव्याप्यधूमवान्पर्वतोवह्निमा
निति प्रत्यक्षसत्वे प्रत्यक्षातिरिक्तंज्ञानंजायतामितीच्छायांतुभ
वत्येव ।। एवंधूमपरामर्शसत्वे आलोकेन वह्निमनुमिनुयामितीं
छायामपिनानुमितिः ।। सिषाधयिषाविरहकाले यादृशासि

धिसत्वेनानुमितिस्त्वादृष्टौ ।। साध्याविशिष्यवक्तव्या ।। तेनपर्वतस्तेज
स्वीपाषाणमयोवह्निमानितिज्ञानसत्वेपिअनुमितेर्नविरोधः ।। पर
तुपक्षतावच्छेदकसामानाधिकरण्येनसाध्यसिद्धावपि
तदवच्छेदेनानुमितिदर्शनात्पक्षतावच्छेदकावच्छेदेनानुमिति
प्रतिपक्षतावच्छेदकावच्छेदेनासिद्धिरेवप्रतिबाधिका ।। पक्षताव
च्छेदकसामानाधिकरण्येनानुमितिंप्रतितुसिद्धिमात्रंविरो
धि ।। इदंबोध्यं ।। यत्रायंपुरुषोनवेतिसंशयानंतरंपुरुषत्वव्या ६२
प्यकरादिमानितिज्ञानंतत्रासत्यामनुमित्सायांपुरुषस्यप्र

धित्वात्तेदोषाः ॥ यद्विषयकत्वंचयाद्दृशविशिष्टविषयकत्वंबोध्यं ॥ तेनबा
धवन्मात्स्यादनुमितिविरोधित्वेपितत्रविशिष्टस्याप्रसिद्धत्वान्नहेतुदो
षः ॥ नचवह्न्यभाववद्व्याप्यपाषाणमयत्ववानितिपरामर्शकालेवह्नि
व्याप्यधूमस्याभासत्वंनस्यात्तत्रबाधविशिष्टस्याप्रसिद्धत्वादितिवाच्यं
॥ इष्टापत्तेः ॥ अन्यथाबाधस्याप्यनित्यदोषत्वापत्तेः ॥ तस्मात्तत्रभ्र
मादनुमितिप्रतिबंधमात्रं ॥ हेतुस्तुनदुष्टः ॥ इत्थंचसाध्याभाववद्
वृत्तिहेत्वादिकंदोषः ॥ तद्वत्ताचहेतोर्येनकेनापिसंबंधेनेतिनव्याः
॥ परेतुयद्विषयकत्वेनज्ञानस्यानुमितिविरोधित्वंतद्वत्त्वंहेत्वाभा

सत्वंसत्प्रतिपक्षविरोधिव्याप्त्यादिकमेवतथातद्वत्त्वंचहेतोर्ज्ञानरूपसं
बंधेननचैवंवह्निमान्धूमादित्यादौपक्षेध्योसाभाववविषयकत्वेना
नुमितिविरोधित्वात्तज्ज्ञानरूपसंबंधेनतद्वत्त्वस्यापिसत्वात्सद्धे
तोरपिबाधितत्वापत्तिरितिवाच्यं ॥ तत्रज्ञानस्यसंबंधत्वाक
ल्पनादत्रसत्प्रतिपक्षइतिचोच्यंद्वारेणसत्कल्पनातत्रबा-
धितव्यवहाराभावादित्याहुः ॥ अनुमितिविरोधित्वंचअनु
मितितत्करणज्ञानान्यतरविरोधित्वंतेनव्यभिचारिणीन।

व्याप्तिः ॥ हेतुज्ञानं च यद्धेतुकं विषयकं तद्धेतुकानुमितिप्रतिबंधकं
॥ तेन एकहेतौ व्यभिचारज्ञाने हेत्वंतरेणानुमित्युत्पादात् तद्भा
वाभाद्यनवगाहित्वाच्च व्यभिचारिज्ञानस्यानुमितिविरोधित्वा
भावेपि नाक्षतिरिति संक्षेपः ॥ यादृशसाध्यपक्षकहेतौ यावं
तो दोषास्तद्वदन्यान्यत्वं तत्र हेत्वाभासत्वं ॥ पंचत्वकथनं तु त
त्संभवाद्बहुलाभिप्रायेण एवं साधारण्याद्यन्यतमत्वमनैकां
तिकत्वं ॥ साधारण्यं साध्यवदन्यवृत्तिः ॥ तेन व्याप्तिज्ञा ५८

त्यसंभवति न त्वनुमितिः ॥ असौ अनुमित्साविरहविशिष्टसमानवि
षयकप्रत्यक्षसामग्रीकामिनीजिज्ञासा यत्स्यात्तंत्रेण प्रतिबंधि
का ॥ एवं परामर्शानंतरं विना प्रत्यक्षेच्छां पक्षादिप्रत्यक्षानुत्पत्तेः
॥ प्रत्यक्षेच्छाविरहविशिष्टानुमितिसामग्रीभिन्नाविषयकप्र
त्यक्षप्रतिबंधिका हेत्वाभासान्विभजते अनैकांतिक इति ॥ त
ल्लक्षणं च यद्विषयकत्वेन ज्ञानस्यानुमितिविरोधित्वं तत्त्वं ॥
तथाहि ॥ व्यभिचारादिविषयकत्वेन ज्ञानस्यानुमितिविरो

नप्रतिबधः क्रीयते ॥ असाधारणः साध्यासमानाधिकरणः ॥ सा
ध्यसामाधिनाकरण्यः ग्रहप्रतिबधः क्रियते ॥ अन्येतु ॥ स
पक्षाद्वृत्तिसाधारणः ॥ सपक्षश्चानिश्चितसाध्यावान् ॥ इथं
चयदा पक्षेसाध्यानिश्चयश्चस्तदानासाधारण्यमत्र हेतो
र्निश्चयादित्याहुः ॥ अनुपसंहारीच अत्यंताभावाप्रति
योगिसाध्यकादिः ॥ अनेनच व्याप्तिरेकव्याप्तिज्ञानप्र
तिबंधः क्रियते ॥ विरुद्धस्तु साध्यव्यापकीभूताभावप्र

तियोगी ॥ अयंच साध्याभावग्रहसामग्रीत्वेन प्रतिबंधकः ॥ सत्प्र
तिपक्षेतु प्रतिहेतुः साध्याभावसाधकः ॥ अत्र हेतुरेक एवेति
शेषः ॥ साध्याभावसाधक एव साध्यसाधकत्वेनोपन्यस्तइ
स्यशक्तिविशेषोपस्थापकत्वाच्च विशेषः ॥ सत्प्रतिपक्षः साध्या
भावव्याप्यवानपक्षः ॥ अगृहीताप्रामाण्यकसाध्यव्याप
कत्वप्रकारकोपस्थितिकालीनतदभावव्याप्यवत्वेनोप ८८
स्थितिविषयस्तथेत्यन्ये ॥ अत्र च परस्परस्यराभावव्याप्य

बउ रिव्याप्यदर्शनं तत्राधिकैस्तया द्वितीयकोटिभानप्रतिबंधान्न सं
शयः ॥ फलबलेन चाधिकबलसमबलभावकल्पनमस्त इत्याहुः ॥
तन्न ॥ तदभावव्याप्यवत्ताज्ञाने सति तदुपनीतभानविशे
षणाद्बोधादेरनुदयात् ॥ लौकिकसन्निकर्षाजन्यदोष
विशेषाजन्यज्ञानमात्रे तस्य प्रतिबंधकत्वलाघवात् ॥
ननूपनीतभानविशेषणाद्बोधे च पृथक् प्रतिबंधकता

गौरवात् ॥ तथा च प्रतिबंधकसत्वात्कथमनुमितिरिति नाहि लौ
किकसन्निकर्षस्थले प्रत्यक्षमिव सत्प्रतिपक्षस्थले संशया
कारानुमितिः प्रामाणिकी येनानुमितिभिन्नत्वेनापि विशे
षणीयं यत्र च कोटिद्वयव्याप्यवत्ताज्ञानं तत्रोभयत्राप्रामाण्य
शंनासंशयः ॥ नाप्रधाअगृहीताप्रामाण्यकस्यैव विरोधिता
नस्य प्रतिबंधकत्वादिति ॥ असिस्काद्वित्वाँश्रीसि[illegible]ध्याद्यस्य मा
तमादूपाआश्रयासिद्धिः पक्षे पक्षतावच्छेदकस्याभावः ॥

यत्रकांचनमयःपर्वतोवह्निमानितिसाध्यतेतत्रपर्वतोनकां
चनमयइतिज्ञानेविद्यमानेकांचनमयेपर्वतेपरामर्शःप्रति
बंधःफलं।।स्वरूपासिद्धिस्तुपक्षोव्याप्यत्वाभिमतःस्या
भावः।।अत्रह्रदोद्रव्यंधूमादित्यादौपक्षेव्याप्यत्वाभिमतः
स्यहेतोरभावज्ञानेपक्षेव्याप्यहेतुमत्ताज्ञानरूपस्यप
रामर्शस्यप्रतिबंधःफलं।।साध्याप्रसिद्ध्यादयस्तुव्याप्य ८७
त्वासिद्धिः।।साध्येसाध्यतावच्छेदकाभावःसाध्याप्रसि

वत्ताज्ञानात्परस्परानुमितिप्रतिबंधःफलं।।अत्रकेचित्।।यथा
घटाभावव्याप्यवत्ताज्ञानेपिघटचक्षुःसंयोगेसतिघटवत्ताज्ञा
नंजायते।।यथाचसत्यपिपीतत्वाभावव्याप्यशंखत्ववत्ता
ज्ञानेसतिपित्तादिदोषेपीतःशंखइतिधीरेवंकोटिद्वयव्या
प्यदर्शनेपिकोटिद्वयस्यप्रत्यक्षरूपःसंशयोभवति।।तथा
सत्प्रतिपक्षस्थलेसंशयरूपानुमितिर्भवतिमयत्रचैकाको

ध्धिः ।। एतज्ज्ञाने जाते कांचनमयवह्निमानित्यादौ साध्यतावछेद
कविशिष्टसाध्यपरामर्शप्रतिबंधः फलं ।। एवं हेतो हेतुताव
छेदकाभावः साधनाप्रसिध्धिः ।। यथा कांचनमयधूमादित्या
दौ गुरुतया नीलधूमत्वस्य अत्र हेतुतावछेदकविशिष्टहेतु
ज्ञानाभावस्थेतुकव्याप्तिज्ञानादेरभावः फलं एवं वह्निमा
न्नीलधूमादित्यादौ गुरुतया नीलधूमत्वस्य न हेतुतावछेद
त्वमपि व्याप्यत्वासिध्धिरित्यपि वदंति व्याप्यत्वकपक्षेसाध्या

भावसाध्यवदन्यत्वादिः ॥ एतस्यचानुमितिप्रतिबंधः फलं ॥ त
५८ द्धर्मिकतदभावनिश्चययोर्लौकिकसन्निकर्षाजन्यदोषावि
शेषजन्यतद्धर्मिकतज्ज्ञानमात्रविरोधीत्ति ॥ नचसंशय
साधारणपक्षेसाध्यसंसृष्टत्वज्ञानमनुमितिकारणं ॥ तद्वि
रोधितयाचबाधसत्प्रतिपक्षयोर्हेत्वाभासत्वमित्युक्तं ॥
साध्यसंशयादिकंविनाप्यनुमित्युत्पत्तेः ॥ एवंसाध्याभा ५८
वज्ञानप्रमात्वज्ञानमपिनप्रतिप्रतिबंधकंप्रमाणाभावाद्धे

ध त्वि। करत्वावास्यानुमितिप्रतिबंधकत्वंवाच्यं ॥ एवंयत्रोत्पत्तिक्ष
णावच्छिन्नघटादौगंधव्याप्यपृथिवीत्ववत्ताज्ञानं तत्रबाधस्ये
वप्रतिबंधकत्वंवाच्यंनचपक्षेघटेगंधसत्वात् ॥ कथंबाधइति
वाच्यं ॥ पक्षतावच्छेदकदेशकालावच्छेदेनानुमितेरनुभव
ध सिद्धत्वादिति ॥ सत्प्रतिपक्षताबीजव्याप्यभिन्नोयोयोहे
त्वाभासस्तद्व्याप्योयःसतन्मतद्ध्यएवांतर्भवति ॥ अन्यथा
हेत्वाभासाधिक्यप्रसंगात् बाधव्याप्यसत्प्रतिपक्षोभिन्नए

व ॥ स्वतंत्रेच्छेनमुनिनापृथगुपदेशात् ॥ सत्प्रतिपक्षव्याप्यस्तु ६
नप्रतिबंधकइति ॥ पक्षपक्षइति ॥ सपक्षविपक्षवृत्तिसाधारण
इत्यर्थः ॥ सपक्षसाध्यवान् ॥ विपक्षःसाध्यवद्भिन्नः ॥ विरुद्ध
वारणायसपक्षवृत्तित्वमुक्तं ॥ वस्तुतोविपक्षवृत्तित्वमेववाच्यं
॥ विरुद्धस्यसाधारणत्वेपिदूषकताबीजस्यभिन्नतयातस्यपृथ
क्कथनात् ॥ यस्तूभयस्मादिति ॥ सपक्षविपक्षव्यावृत्तइत्यर्थः ॥
सपक्षःसाध्यवत्तयानिश्चितःविपक्षःसाध्यशून्यतयानिश्चि

तः॥शब्दोनित्यःशब्दत्वादित्यादौयथाशब्देनित्यत्वस्यसंदेह
सदासपक्षत्वंघटादीनामेव॥तद्व्यावृत्तिंचशब्दत्वमिति॥त
दासाधारण्यं॥यदेतुशब्देनिश्चयस्तदानासाधारणः॥इदं
तुप्राचांमते॥नवीनमतंपूर्वमुक्तं॥केवलान्वयिपक्षइति॥
सर्वमभिधेयंप्रमेयत्वादित्यादौसर्वस्यैवपक्षत्वात्॥सामा
नाधिकरण्यग्रहस्थलांतराभावान्नानुमितिः॥इदंतुनस
म्यक्॥पक्षैकदेशेसहचारग्रहेपिपक्षतेरभावात्॥अस्तुवा ६०

रयाच्च॥अन्यथासत्प्रतिपक्षादावपितदभावव्याप्यवत्ताज्ञा
नप्रमात्वविषयकत्वेनप्रतिबंधकत्वापत्तेः॥किंतुभ्रमत्वज्ञानाना
स्कंदितबाधबुद्धेःप्रतिबंधकत्वात्तत्रभ्रमत्वशंकाविघट
नेप्रामाण्यज्ञानंक्वचिदुपयुज्यते॥बाधस्थलेपक्षेहेतुस
त्वेव्यभिचारःपक्षेहेत्वाभावेस्वरूपासिद्धिरेवदोषइतिवा
च्यं॥बाधज्ञानस्यव्यभिचारिज्ञानादभेदात्॥किंचय
त्रपरामर्शानंतरंबाधबुद्धिस्तत्रव्यभिचारिज्ञानादेरकिं

त्ययह चाराग्रहः ॥ तां च ताप्य ज्ञानरूपासिद्धिरेव न तु हेत्वाभा
सत्वं तस्य तथापि केचल्लान्वयिसाध्यकत्वं तत्वामित्युक्तं ॥ यः
साध्यवतीति ॥ एवकारेण साध्याधिकरणत्वावच्छेदेन हेत्वभा
वो बोधितः ॥ तथा च ॥ साध्यव्यापकीभूताभावप्रतियोगि
त्वं तादित्यर्थः ॥ आसिद्धिं विभजते ॥ आश्रयासिद्ध्यादि
पक्षासिद्धिरिति ॥ आश्रयासिद्धिरित्यर्थः ॥ अपरेति ॥ स्वरू
पासिद्धिरित्यर्थः ॥ नीलधूमादिकमिति ॥ नीलधूमत्वं गुरुत्व

यानहेतुतावछेदकंस्वसमानाधिकरणव्याप्यतावछेदकधर्मांतराघटितत्वस्ये
वव्याप्यतावछेदकत्वात्॥धूमप्रागभावाघितत्वसंग्रहाय स्वसमानाधिकरणे
ति॥कपिसंयोगतदभावव्याप्यवत्तापरामर्शेपि नसत्प्रतिपक्षित्वं मतउ
क्तं विरुद्धयोरिति॥तथाच स्वसाध्यविरुद्धसाध्याभाववव्याप्यवत्ताप
व्याप्य रामर्शकालीनसाध्यवत्तापरामर्शाविषय इत्यर्थः॥ साध्यशून्य इति॥
पक्षः पक्षतावछेदकविशिष्ट इत्यर्थः॥ तेन घटे गंधसत्वेपि नक्षतिः॥
एवंभूतावछिन्नो वृक्षः कपिसंयोगीत्यत्रापि बोध्यं॥उपमितिंप्रसा
दयति॥ग्रामीणस्येति॥यत्र आरण्यकेन केनचिद्ग्रामीणायोक्तं गो ६१

धापत्तेः॥ तत्रापि वृत्त्या पदजन्यत्वं बोध्यं अन्यथा घटादिपदात्सम
वायसंबंधेनाकाशस्मरणे जाते आकाशस्यापि शाब्दबोधापत्तेः
॥ वृत्तिश्च शक्तिलक्षणान्यतरसंबंधः॥ अत्रैव शक्तिज्ञानस्यो
पयोगः॥ शक्तिश्च पदेन सह पदार्थस्य संबंधः॥ सचास्माच्छ
ब्दादयमर्थो बोद्धव्य इति ईश्वरेच्छारूपः॥ आधुनिके नाम्नि श
क्तिरस्त्येव॥ एकादशेऽहनि पिता नाम कुर्यादितीश्वरेच्छायाः
दा सत्वाधुनिकसंकेतिते तु न शक्तिरिति संप्रदायः॥ नव्याः

स्त्वीश्वरेच्छा तु न शक्तिः॥ किं त्विच्छैव तेनाधुनिकसंकेतितेऽ
पि शक्तिरस्तीत्याहुः॥ शक्तिग्रहस्तु व्याकरणादितः॥ तथाहि
शक्तिग्रहं व्याकरणोपमानकोशाप्तवाक्याद्व्यवहारतश्च॥ वा तु
स्य. क्यशेषाद्विवृतेर्वदंति सान्निध्यतः सिद्धपदस्य वृद्धाः॥ धातुप्रकृ
तिप्रत्ययादीनां शक्तिग्रहो व्याकरणाद्भवति॥ क्वचित्तु सत्यपि
ता बाधके त्यज्यतेऽपि॥ यथा वैयाकरणैराख्यातस्य कर्तरि शक्ति
रुच्यते॥ चैत्रः पचतीत्यादौ कर्त्रा सह चैत्रस्याभेदेनान्वयः॥ त

श्चगोत्वात्त्यज्यते॥ किंतु कृतो शक्तिलाघवात्॥ इति श्चैत्रादौ प्र
कारीभूय भासते॥ नच कर्तुरनभिधानाच्चैत्रादिपदानंतरं तृती
यस्यादिति वाच्यं कर्तृसंख्यानभिधानस्य तत्र तंत्रत्वात्॥ संख्या
भिधानयोग्यश्च कर्मत्वाद्यनवरुद्धः प्रथमांतपदोपस्थाप्यः
कर्मत्वादीत्यस्य इत्तरविशेषणत्वात् योविवक्षितोर्थः॥ तेन नचैत्र त्व
स इव गच्छतीत्यादौ न चैत्रैस्त्यान्वयः॥ अत्र कर्मादौ नाविशेषत्या
स्त तात्पर्यं तद्वारणाय प्रथमांतेति पदद्धात्वर्थातिरिक्तावि ९३

सदृशो गवयपदवाच्यं इति॥ पश्चात्त्र ग्रामयेन क्वचिदरण्यादौ गवयो दृष्टः॥ त
त्र गोसादृश्यस्य ज्ञानं यज्जातं तदुपमितिकरणं॥ तदनंतरं गोसदृशो गवयो पद
वाच्यं इति अतिदेशवाक्यार्थस्मरणं यज्जायते तदेव व्यापारः॥ तदनंतरं गव
ये गवयपद॰वाच्यता ज्ञानं ॥ यज्जायते तदुपमितिः॥ न त्वयं गवयपदवाच्यं इ
त्युपमितिः॥ गवयांतरे शक्तिग्रहाभावप्रसंगात्॥ शाब्दबोधप्रकारं दर्शयति
॥ पदज्ञानं त्विति॥ न तु ज्ञायमानं पदं करणं॥ पदाभावेपि मौनिश्लोका
दौ शाब्दबोधात्॥ पदार्थधीरिति॥ पदजन्य पदार्थस्मरणं व्यापारः
अन्यथा पदज्ञानवतः प्रत्यक्षादिना पदार्थोपस्थितावपि शाब्दबो

लादिपदानांनीलरूपादौनीलादिविशिष्टेचशक्तिः॥कोत्रेन
शुक्लादित्वात्तथापिलाघवान्नीलादौशक्तिः॥नीलादिविशि
ष्टेतुलक्षणेति॥एवमाप्तवाक्यादपियथाकोकिपिकपदवा लः
च्यइत्यादिविशिष्टाद्वासिकादिपदेशक्तिग्रहः॥एवंव्यवहारा
दपि॥यथाप्रयोजकवृद्धेनघटमानयेत्युक्तेतच्छ्रुत्वाप्रयोज्य
वृद्धेनघटआनीतः॥तदवधार्यपार्श्वस्थोबालोघटानय
नरूपंकार्यंघटमानयेतिशब्दप्रयोज्यमित्यवधारयति॥तेत्र त

घटंनयगामानयेत्यादौवाक्यादौआवापोद्वापाभ्यांघटादिपदा
नांकार्यान्वितघटादौशक्तिंगृह्णाति॥इत्थंचभूतलेनीलो
घटइत्यादिशब्दान्नशाब्दबोधःघटादिपदानांकार्यान्वितघ
टादिबोधेसामर्थ्यावधारणात्कार्यबोधंप्रतिचलिङानांसा दी
मर्थ्यात्तदभावान्नशाब्दबोधइतिकेचित्॥तन्नप्रथमतःकार्या
न्वितघटादौशक्त्यवधारणेपिलाघवेनपश्चात्तस्यपरि-
त्यागौचित्यात्॥अतएवचैत्रपुत्रस्तेजातःकन्यातेगर्भिणी

इत्यादौ सुखप्रसादसुखमालिन्याभ्यां सुखदुःखे अनुमाय तत्कारण
६८ तेन परिशेषाच्छब्दबोधे निर्णीयते स्थैर्यं तु तया व्याप्तिमवधारयति ॥ त
थात्वव्यभिचारो कार्यान्वितेन शक्तिः ॥ न च तत्र तत्पदस्येस्या
दिशक्तांतरमध्याहार्यमाणाभावात् ॥ चैत्रपुत्रस्ते जातो भूत्तद्
मत्याह्रे तदभावाच्च ॥ इत्थं च लाघवादन्वितघटेपि शक्तिं त्यक्तू
साद्यघटपदस्य घटमात्रे शक्तिमवधारयति ॥ वाक्यशेषा
यथा यवमयश्चरुर्भवति इत्यत्र य- ६८
द्यपि शक्तिग्रहः ॥

शेषस्तदर्थ एवं प्रथमदलार्थः ॥ तेनत्र इव गच्छतीत्यत्रैत्र चैत्रादेर्वा
रणं ॥ श्लोकं पचतीत्यादौ श्लोकादेर्वारणाय द्वितीयं दलं ॥ त-
स्य द्वितीयं लोपस्थाप्यतावारणं ॥ एवं व्यापारेपि न शक्ति-
गौरवात् रथो गच्छतीत्यादौ व्यापारआश्रयत्वे वा लक्षणा
जानातीत्यादौ त्वाश्रयत्वे नश्यतीत्यादौ प्रतियोगित्वे नि
रूढलक्षणया ॥ उपमानाद्यथा शक्तिग्रहस्तथोक्तं ॥ एवं को
शादपि शक्तिग्रहः ॥ सति बाधके क्वचित्यज्यते ॥ यथा नी

वपदस्यदीर्घत्वरूकविशिष्टशक्तिः आर्य्याणांप्रयोगः ॥ कंगोचम्ले
छानां ॥ तत्रहि यत्रान्याओषधयोयाम्लायंते अथैतेमोदमानाइवो
त्तिष्ठंतीतिवाक्यशेषाद्दीर्घशूकेशक्तिर्निर्णीयते ॥ कंगोतुशक्ति
भ्रमात्प्रयोगः ॥ ननानार्थशक्तिकल्पनागौरवात् ॥ हरिपदादौ
विनिगमकाभावात्तनानाशक्तिकल्पनं ॥ एवंविवरणादिभिश्श
क्तिग्रहः विवरणंतुतत्समानार्थकपदांतरेणपदार्थकथनं ॥ य
थाघटोऽस्तीत्यस्यकलशोस्तीत्यनेनविवरणेघटपदस्यक
लशेशक्तिग्रहः ॥ एवंपचतीत्यस्यपाकंकरोतीत्यनेनविवरण

दाख्यातस्य यत्नार्थत्वं कल्प्यसि ।। एवं प्रसिद्धपदसांनिध्यादपि शक्ति
ग्रहः ।सहकारतरौ मधुरं पिको रौतीत्यादौ पिकपदस्य शक्तिग्रह इति
।तत्र जातावेव शक्तिर्न तु व्यक्तौ ।। व्यभिचारादानंत्याच्च ।। व्यक्तिं वि
ना च जातिभानस्यासंभवाद्व्यक्तेरपि भानमिति केचित् ।। तन्न । श
क्तिं विना व्यक्तिभानानुपपत्तेः ।न च व्यक्तौ लक्षणा अनुपपत्तिप्र
तिसंधानं विनापि व्यक्तिबोधात् ।। न च शक्त्यानंत्यं ।। सकलव्य
क्तौ एकस्या एव शक्तेः स्वीकारात् ।। न चाननुगमः ।। गोत्वादेरेवा
नुगमकत्वात् ।। किं च गोः शक्यत्वे शक्तिग्रहो यदि तदा व्यक्तौ श १६५

दे प्रयोगः स्यादिति वाच्यं ॥ रूढिज्ञानस्य केवलयौगिकार्थज्ञा
ने प्रतिबंधकत्वादिति प्रांचः ॥ वस्तुतस्तु समुदायशक्त्युपस्थि
त पद्मत्वयथार्थपंकजनिकर्तुरन्वयाभावात्सान्निध्यात् ॥ यत्र
तु रूढ्यर्थस्य बाधः प्रतिसंधीयते तत्र लक्षणया-या कुमुदादेर्बो
धः यत्र तु कुमुदत्वेन रूपेण बोधे न तात्पर्यज्ञानं पद्मस्य न बा
धस्तत्र चावयवशक्तिमात्रेणानिर्वाह इत्याहुः ॥ यत्र तु स्थलप-
द्मादावयववयवार्थबाधस्तत्र समुदायशक्त्या पद्मत्वेन रूपेण बोधः
॥ यदि तु स्थलपद्मं विजातीयमेव तदा लक्षणयैवेति ॥ यत्र तु

शक्तिः। यदि तु गोत्वं शक्यमिति शक्तिग्रहस्तदा गोत्वत्त्वप्रकारकं
पदार्थस्मरणं शाब्दबोधश्च न स्यात्। समानप्रकारकत्वेनैव शक्ति
ज्ञानस्य पदार्थस्मरणं शाब्दबोधं प्रति च हेतुत्वात्। किंच गोत्वे
यदि शक्तिस्तदा गोत्वत्वं शक्यतावच्छेदकं गोत्वत्वं च गवेतरासम वायत्वं
वेतत्वे सति सकलगोसमवेतत्वं तथा च गोव्यक्तीनां शक्यता-
वच्छेदकेनुप्रवेशात्तेनैव गौरवं। तस्मात्तत्तज्जात्याकृतिविशि
ष्टतत्तद्व्यक्तिबोधानुपपत्त्या कल्प्यमाना शक्तिर्जात्याकृतिवि
शिष्टव्यक्तावेव विश्राम्यति। शक्तं पदं च क्वचिद्यौगिकं क्वचि

रूढं क्वचि योगरूढं क्वचिद्यौगिकरूढं यत्रावयवार्थ एव बुध्यते
तद्यौगिकं ॥ यथा पाचकादि पदं ॥ यत्रावयवनैरपेक्षेण सम
दाय। शक्तिमात्रेण बुध्यते तद्रूढं ॥ यथा गोपदमंटपादिपदं ॥
त्व यत्रावयवार्थशक्तिविषये समुदायशक्तेरप्यस्ति तद्योगरूढं
॥ यथा पंकजादिपदं तथाहि ॥ पंकजपदमवयवशक्त्या पं
कजनिकर्तृरूपमर्थं बोधयति ॥ समुदायशक्त्या च पद्म
त्वेन रूपेण पद्मं बोधयति ॥ न च केवलावयवशक्त्या कुमु

यौगिकार्थरूढ्यर्थयोः स्वातंत्र्येण बोधः तद्यौगिकरूढं ।। यथोद्भिदादि
[कं] पदं ।। तत्रोद्भिदः कर्त्ता तरुगुल्मादिरप्यवबुध्यते ।। यागविशेषोपीति ।
लक्षणा शक्यसंबंध इत्यादि ।। गंगायां घोष इत्यादौ गंगापदस्य शक्या
र्थे प्रवाहरूपे घोषस्यान्वयानुपपत्तिस्तात्पर्यानुपपत्तिर्वा यत्र प्रति
संधीयते तत्र लक्षणया तीरबोधः सा च शक्यसंबंधः ।। तथाहि ।। प्र
वाहरूपशक्यार्थसंबंधस्य तीरे गृहीतत्वात्तत्तीरस्य स्मरणं ।।
ततः शाब्दबोधः ।। परं तु यद्यन्वयानुपपत्तिर्लक्षणाबीजं स्यात्तदा ६८
यष्टीः प्रवेशयेत्यत्र लक्षणा न स्याद्यष्टिषु प्रवेशान्वयस्यानुपप ६७

तेरभावात्॥तेनअत्रैवत्रोभोजनतात्पर्यानुपपत्तियष्टिधरेलक्षणा॥एवं
काकेभ्योदधिरक्ष्यतामित्यादौकाकपदस्यदध्युपघातकेलक्षणा॥
सर्वतोदधिरक्षायांतात्पर्यविषयत्वात्॥एवंछत्रिणोयांतीत्या
दौछत्रिपदस्यैकसार्थवाहित्वेलक्षणा॥इयमेवाजहत्स्वार्थलये
त्युच्यतेएकसार्थवाहित्वेनरूपेणछत्रितदन्ययोर्बोधात्॥यदि
चान्वयानुपपत्तिर्लक्षणाबीजंस्यात्तदाक्वचिद्गंगापदस्यतीरेक्व
चिद्घोषपदस्यमत्स्यादौलक्षणेतिनियमोनस्यात्॥इदंतुबोध्यं
॥शक्यार्थसंबंधोयदितीरत्वेनरूपेणगृहीतस्तदातीरत्वेनतीरबो

धः॥ गंगातीरत्वेन रूपेण गृहीतस्य तदा तेनैव रूपेण स्मरणं॥ अत एव
लक्ष्यतावच्छेदकेन लक्षणा॥ तत्प्रकारकबोधस्य तत्र लक्षणां विना
ऽनुपपत्तेः परंतु एवं क्रमेण वाक्यतावच्छेदकापत्त्या किं न स्यात् तत्प्रका
रकवाक्यार्थस्मरणं प्रति तत्तत्पदस्य सामर्थ्यमित्यस्य सुवचत्वादि
ति विभावनीयं॥ यत्र तु वाक्यार्थपरंपरासंबंधेन पालक्षणा सा ल
क्षितलक्षणेत्युच्यते॥ यथा द्विरेफादिपदे रेफद्वयसंबंधो भ्रमरप
देज्ञा